Patanjali
Mahabhasyapradipodyotah

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1011.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇASTRI.

VOL. II, FASCICULUS IV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,
46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ... Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each	1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3	1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–5	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	19	14
Catasahasrika-prajna-parimita Part I Fasc. I & II @ /6/	0	12
Çlokavartika, (English) Fasc. 1–2	1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...	4	14
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3	1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–4	1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–4 @ /6/ each	4	14
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	2
[illegible]rkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each	4	8
[illegible]nsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	14
[illegible]ti, (Text) Fasc. 1–3 @ /6/	1	2
[illegible] (Text) Fasc. 1–5 @ /6/	1	14
[illegible] Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	4
[illegible] Fasc. 1–4 (Text) @ /6/	1	8
[illegible]t)	0	10
[illegible]akaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. [illegible]	3	6
[illegible]/	6	0

एवं च प्रकृतिपरिणामविशेषजातेः स्वत एव "लिङ्गयोग" इति तात्पर्य्यम् ॥ भाष्ये

कथं तस्येति । (भा)

असंकरेणेति शेषः ॥ ननु शब्दनित्यतायां वाचनिकानीत्ययुक्तमत आह

संकीर्णेति । (कै)

गोदौ पञ्चाला इत्यादावेकत्रापि द्विवचनादिदर्शनेन सार्थकमिति भावः ॥

व्याचष्ट इति । (कै)

"द्व्येकयोरि" (१ । ४ । २२) त्यादिसूत्राणीति भावः ॥ अभिधेयत्वेऽप्युपसर्जनत्वात् कथं तत्कृत उपकारोऽत आह

तत्र यथेति ॥ (कै)

नैकाकृतिरिति प्रतिज्ञा हीयेत यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति ॥ एवं तर्हि लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात् । लिङ्गवचनानि सिद्धानि भवन्ति । कुतः । गुणविवक्षाया अनित्यत्वात् । अनित्या गुणविवक्षा । कदाचिदाकृतिरेकत्वेन

प्रतिज्ञाहानिः द्वित्वबहुत्वसम्बन्धस्याप्यभ्युपगमात् द्विवचनबहुवचनवदनेकशब्दत्वमपि प्राप्नोतीत्येकशेषोऽपि वक्तव्य इत्यर्थः ॥ गुणविवक्षानित्यत्वादिति । भा । स्वत आकृतेरेकत्वं द्रव्यगतद्वित्वबहुत्वविवक्षायां तु द्विवचनबहुवचने भवतः । आश्रयधर्मैराश्रितानां व्यपदेशः । यथा संपन्नो यवो

"संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः ।
संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः स प्रसवे पुमान्" ॥

भाष्ये

द्रव्यं गुणभूतमिति । (भा)

अस्योपपत्तिरुक्ता [1]"जात्याख्यायामि"ति सूत्रे ॥

साधनसंख्याक्षत इति । (कै)

साधनसंख्यारोप इत्यर्थः ॥

इत्यदोष इति । (कै)

एवं च लिङ्गयोगः स्वत एव । संख्यायोगस्त्वारोपेण । [2]एका आकृतिरिति प्रतिज्ञा चानारोपितसंख्याभिप्रायानामप्येकशेषारम्भः । अनेकशब्दप्रयोगे मानाभावादिति तात्पर्य्यम् ॥ अत्र भाष्ये द्रव्य-

१ अ १ । पा २ । सू ५८ ॥

२ एकाकृतिरिति प्रतिज्ञा । एका आकृतिरिति च प्रतिज्ञा । इति पाठोऽपि दृश्यते भाष्ये ॥

विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन कदाचित् स्त्रीत्वेन कदाचित् पुंस्त्वेन कदाचिन्नपुंसकत्वेन ॥ भवेल्लिङ्गपरिहार उपपन्नो वचन-परिहारस्तु नोपपद्यते । यदि कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेनैकाकृतिरिति प्रतिज्ञा हीयेत यच्चास्य पक्ष-

विनष्टो यव इति संपत्तिविनाशाभ्यां द्रव्यगताभ्यां जातिर्व्यपदिश्यते तथा लिङ्गसंख्याभ्यामपीत्यर्थः ॥ भवेदिति । भा । अभ्युपगमविरोधाभावात् । वचनपरिहारस्त्वभ्युपगमं विरुणद्धि द्वित्वबहुत्वयोगेऽभ्युपगतैकत्वहानादनेक-शब्दत्वप्रसङ्गाच्चेत्यर्थः ॥ लिङ्गपरिहारस्यापीति । भा । "विशेषणानां चा-

"उभयोरन्तरं यच्च तदभावे नपुंसकम्" ।

इति ॥ अयमर्थ । संस्त्यानं स्त्री । सत्त्वरजस्तमोलक्षणानां गुणानाम-

पदार्थवादे आकृतेर्विशेषणत्वोक्त्या [1]तज्जात्यानुकृतौ कृतानेकव्यक्ति-बोधस्यैकस्मादेव शब्दात् संभवेन नानाशब्दप्रयोगाप्राप्त्या तत्पक्षे-प्येकशेषो न कार्य्य इति सूचितम् ॥

[2]जाति वादेति।

(जातिवादे। इ) व्यक्तिद्रव्यवादे जातिः शक्यतावच्छेदिकेति च सूचितम् ॥ ननु "गुणवचनानाम्" इत्यादिवचनातन्त्वाः (तु। इ) तथा इह तु अजातिरिति निषेधात् कथं तत्प्रवृत्तिरत आह

जातितद्वतोरिति। (कै)

न त्वत्र तद्वचनप्राप्तिः। अत एव "गुणवचनवद्" इति भाष्ये उक्तमिति भावः॥ यद्यपि जातेराश्रयतो न लिङ्गादीति "विशेषणानां चे" (१। २। ५२) त्यत्रोक्तं तथापि विशेष्यगतलिङ्गादिनिषेधः सः

[1] तज्जात्यनुमतौ। क॥ [2] "जातिवादेति" इति नास्ति कैयटादौ॥

स्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्य भवति॥ लिङ्गपरिहारस्यापि नोपपद्यते। किं कारणम्। आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्त्तते उत्पत्तिप्रभृत्या विनाशात्तल्लिङ्गं न जहाति। तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्यं कश्चित् स्वकृतान्त आस्थेयः। कोऽसौ स्वकृतान्तः।

जातिः" (१। २। ५२) इत्यत्रोक्तम् "आविष्टलिङ्गा जातिः" इति॥ तत-श्चैकमेवाश्रयगतं लिङ्गमुपादत्ते सर्वदा जातिः यथा ग्राम्यपशुजातयः सङ्घे स्त्रीत्वमेवोपाददते गाव इमा इति अन्यास्तु पुंस्त्वमेव ब्राह्मणा इमे इति

पचयः। प्रसवो गुणानामुपचयः। स एव पुमान्। सूतेर्धातोः सपसकारस्य पकारादेश इत्यर्थः। सूडो डुम् सुन्निति माधवः। यत्तूज्ज्वलदत्तेन यातेर्डम-

तत्राश्रयपदेन विशेष्यग्रहणात् इहलाश्रयपदेनाधारो गृह्यत इति न विरोध इति भावः। अत्र चाभेद एव बीजं यो यदभेदमापन्नः स स्वाभिन्नाश्रयगतलिङ्गवचनादिग्राहीति नियमात्। इयांस्तु विशेषः शुक्लादिशब्दवाच्यगुणानां गुणिना भेदाभेदविवक्षा (चे। इ। क) शब्दवाच्यजातेस्त्वभेदविवक्षैवेति॥ परे तु तयोरभेदमादाय ग्रन्थयोजने तदभेदादेवारम्भणादीन्यपि तत्र भविष्यन्तीत्यधिकरणगतिरित्युत्तरग्रन्थानुत्थानमतो गुणवचनानां विशेष्यगतलिङ्गादिग्राहित्ववद्जातेराश्रयगतलिङ्गादिग्राहित्वं स्वभावादिति एतद् भाष्यार्थमाहुः॥ भाष्ये

संस्त्यानप्रसवौ लिङ्गम्।

संस्त्यानप्रसवौ लिङ्गमास्थेयौ। किमिदं संस्त्यानप्रसवाविति।

संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप्प्रसवे पुमान्॥

ननु च लोकेऽपि स्त्यायतेरेव स्त्री सूतेश्च पुमान्। अधिकरणसाधना लोके स्त्री। स्त्यायत्यस्यां गर्भ इति। कर्तृसाधनश्च पुमान्। सूते पुमानिति। इह पुनरुभयं भावसाधनम्। स्त्यानं प्रवृत्तिश्च। कस्य पुनः स्त्यानं स्त्री प्रवृ-

---

यथेत्यर्थः॥ तस्मादिति। भा। सिद्धान्तवादी युक्तं पक्षमाश्रयति। लौकिकमिति। भा॥ स्तनकेशादिसम्बन्ध इत्यर्थः। तस्मिन्नाश्रीयमाने लिङ्गान्तरेण सम्बन्धो न स्यात्। तस्मात् स्वसिद्धान्तव्यवस्थाश्रीयते। गुणानां सत्त्वरजस्तमः परिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यस्थावस्थाः शब्दैकगोचराः लिङ्गत्वेन परिगृह्यन्ते आत्मनस्त्वपरिणामिरूपत्वादप्रवृत्तिधर्मत्वेऽप्यन्यप्रवृत्त्यनुयायित्वाल्लिङ्गयोगः॥ वाचनिकानीति। भा। सङ्कीर्णप्रयोगोपलम्भात्। असङ्ग-

---

सुन्नित्युक्तम्। यत्तु "पुंसोऽसुङ्" (७।१।८६) इति सूत्रे न्यासरक्षिताभ्यां पुनातेर्मक्सुन् ह्रस्वश्च इति सूत्रं पठितं तदुभयमपि भाष्याननुगुणान्तयो-

आकृताविति। (भा)

[1]प्रधानभूतायामित्यादि आकृतेरेव तज्जन्य बोधे प्रधानं क्रिया तु पात्रे इव द्रव्ये इति भावः। शाब्दबोधे तु न बाधज्ञानं प्रतिबन्धकमिति न तदनुपपत्तिः॥

सर्व एवेति। (कै)

गौरानीयतामित्यादिरपीत्यर्थः॥ भाष्ये "आरम्भणं" क्रमः॥ "आलम्भनं" स्पर्शः॥

आकृति सहचरिते इति। (भा)

आकृत्याश्रये इत्यर्थः॥

इतीन्द्रवद्विषयः। (भा)

स्वभावाद् हेतुरहितदृष्टान्तेनाप्यनेकवृत्तित्वं जातेरभ्युपगम्यते इत्यर्थः॥ नन्वनेकव्यक्तिवृत्तिसामान्यलक्षणविरुद्धमेतदत आह

१ आकृतिः प्रधानभूता। भा॥

त्तिर्वा पुमान्। गुणानाम्। केषाम्। शब्दस्पर्शरूपरसगन्धानाम्। सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्थानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः। यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः शब्दस्पर्शौ रूपमिति। रसगन्धौ न सर्वत्र। प्रवृत्तिः खल्वपि नित्या। नहीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्य-

र्थो यथा द्रव्यपदार्थकस्य वाचनिको वचननियमः तथाकृतिवादिनोऽपि स ह्येवं व्याचष्टे एकाश्रयसम्बन्धविवक्षायामाकृतेरेकवचनं यथा पशुना यजेतेति। अनेकाश्रयसम्बन्धविवक्षायां द्विवचनबहुवचने॥ ननु द्रव्यस्यानभिधेयत्वात् कथं तत्कृत आकृतेर्वचनोपकार इत्याह। न हीति। भा। तत्र

रूपचयापचययोरभावे सति यदुभयोरन्तरसदृशं तन्नपुंसकम्। न भ्राणपादिति (६। ३। ७५) निपातनादिति भावः। तथा च स्थितिमात्रं न पुंसकम्।

यथेति । (भा)

द्रव्याधीनस्थितिकत्वमाश्रितत्वं विवक्षितमित्यर्थः ॥

अन्यथापीति । (कै)

कर्णशष्कुल्यनधीनस्थितिकस्याप्याकाशस्य तदवच्छिन्नतया श्रोत्ररूपत्ववद्द्रव्यमनाश्रित्यस्यापि महा सामान्यस्यनित्यस्य गवादिद्रव्यपरिच्छिन्नतया गोत्वादिरूपतेत्यर्थः ॥ "अन्यत्रापीति" क्वचित् पाठः । तत्र व्यक्त्यन्तरेत्यर्थः ॥

प्रत्ययः । (कै)

ज्ञानम् ॥

वतिष्ठते। वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते । तच्चोभयं सर्वत्र । यद्युभयं सर्वत्र कुतो व्यवस्था । विवक्षातः । संस्त्यानविवक्षायां स्त्री प्रसवविवक्षायां पुमान् उभयोरप्यविवक्षायां नपुंसकम् । तत्र लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वादिति लिङ्गपरिहार उपपन्नः ॥ वचनपरिहारस्तु नोपपद्यते । वचनपरिहारस्याप्युपपन्नः । इदं तावदयं प्रष्टव्यः । अथ यस्य द्रव्यं पदार्थः कथं तस्यैकवचनद्विवचनबहुवचनानि भवन्तीति । एवं स वक्ष्यति ।

यथा पचति पचतः पचन्तीति क्रियाप्राधान्येऽपि साधनसङ्ख्याकृतो वचनभेदः एवमाकृतिप्राधान्येऽपि द्रव्यसङ्ख्याकृत इत्यदोषः ॥ यदसाविति । भा ॥ जातितद्वतोरभेदाध्यवसायाद् द्रव्यात्मा जातिः प्रतीयमाना तद्गतलिङ्गसङ्ख्याग्राहिणीत्यर्थः ॥ चोदनासु च तस्यारम्भादिति यदुक्तं तत् परिहारार्थमाह । अधिकरणगतिरिति । भा । यथाग्नीरानीयतामित्युक्ते केवलस्याग्नेरानयनासम्भवान्नान्तरीयकत्वादचोदितमपि पात्रमानीयते एतदेवाग्नेरानयनं

अत एवाविर्भावतिरभावयोरपि स्थितिसामान्यविवक्षासम्भवान्नपुंसकलिङ्गसर्वनामेति सिद्धान्तः। स्त्रीपुमान्नपुंसकमिति शब्दाश्च शुक्लयादिशब्दवद्धर्म

अभिधानम्। (कै)

शब्दः॥

पूर्वोक्त एवेति। (कै)

अनाश्रितत्वादि (तोष्ट एवेत्यर्थः। द) त्येष एवेत्यर्थः॥

भेदादिति। (कै)

नित्यमेकमनेकव्यक्तिवृत्तिसामान्यं तद्विपरीतं द्रव्यमितिभेद इत्यर्थः॥

अनैकात्म्याद् (भा)

इत्यस्य भिन्नस्वभावत्वादित्यर्थ इति भावः॥ ननु विग्रहसत्वे द्वन्द्वापत्तिरत उक्तं

एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति। यदि तस्यापि वाचनिकानि न स्वाभाविकान्यहमप्येवं वक्ष्याम्येकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति। न ह्याकृतिपदार्थिकस्य द्रव्यं न पदार्थो द्रव्यपदार्थिकस्य वाकृतिर्न पदार्थः। उभयोरुभयं पदार्थः कस्यचित्तु किञ्चित्प्रधानभूतं किञ्चिद्गुणभूतम्। आकृतिपदार्थिकस्याकृतिः प्रधानभूता द्रव्यं गुणभूतम्। द्रव्यपदार्थिकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता॥

यत्वाचस्यस्य तथाकृतावारम्भणादीनि चोद्यमानानि सामर्थ्यात् साहचर्य्यात् द्रव्यमभिनिविशन्ते। सर्व एवाकृतेः क्रियायोगोऽन्तर्भावितद्रव्याया एवेति द्रव्यद्वारकः सम्पद्यते॥ अनाश्रितत्वादिति। भा। यथा गुणानां द्रव्याधीनस्थितित्वादाश्रितत्वं नैवमाकृतेः अन्यत्रापि प्रत्ययाभिधानयोराकृतिनिमित्तयोर्भावान्नित्यत्वं तस्या इत्यर्थः॥ इतरः सम्बन्धमात्रमाश्रितत्वं मत्वा पृच्छति। किमुच्यत इति। भा॥ अनैकात्म्यादिति। भा। पूर्वोक्त

धर्म्मिणि वर्त्तन्त इत्यवधेयम्। स्वकृतान्त इति। कृतान्तौ यमसिद्धान्तौ इत्यमरः। वैयाकरणसिद्धान्ते इत्यर्थः॥

समुच्चयोपपत्त्येति । (कै)

तत्र तु सहविवक्षाभावान्न द्वन्द्व इति भावः । सहविवक्षायां तु न तथा प्रयोगोऽनभिधानादितिबोध्यम् ॥ द्रव्यगतलिङ्गादिग्राहित्ववस्तुगतभेदग्राहित्वमपि तस्या इति बोध्यम् ॥

भिन्नास्विति । (कै)

आश्रयभेदात् कर्मभेदाच्च इत्यर्थः ॥

तद्देवेति । (कै)

समवेतसमवायेनेत्यर्थः ॥ आश्रयान्तरगतं पाकक्रियागतं सामान्यम् पाकत्वादिपरम्परयोपकर्तृत्वे दृष्टान्तमाह

यथेति । (कै)

एवं च व्याप्यादिगतसामान्यस्य परम्परया द्रव्ये सत्त्वेन तत्तद्जातिविशिष्टस्य द्रव्यस्य वाच्यत्वमितिभावः ॥ न चैवं नानार्थोच्छेदः ।

गुणवचनवद्वा । वा ॥ गुणवचनवद्वा लिङ्गवचनानि भविष्यन्ति । तद्यथा । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति । यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति । एवमिहापि यदसौ द्रव्यं श्रिताकृतिस्तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति ॥ अधिकर-

---

एवार्थो विशिष्यानेन प्रतिपाद्यते नित्या ह्याकृतिरेका सर्वत्रगा तद्विपरीतं द्रव्यमिति भेदाद् द्रव्यविनाशेऽपि न जातेर्विनाशः । गुणानां तु द्रव्याधीनस्थित्युत्पत्तित्वादाश्रयनाशेऽवश्यं नाश इति न तैर्व्यभिचारः ॥ वृक्षस्योऽवतान इति । भा । यथा वृक्षस्योपरिशाखादिलतावतानः स्थितो न वृक्षविनाशमनुविनश्यति तथा जातिरपीत्यर्थः ॥ वैरूप्यविग्रहाविति । भा । द्रव्याणां स्वगतभेदप्रतिबद्धौ वैरूप्यविग्रहावित्यर्थः । तत्र द्रव्यगतभेदोपचारादेकस्याम-

नानाजातीनां सम्बन्धघटकत्वेन [1]नानार्थत्वोपपत्तिः (त्तेः। क)। तत्र क्रियारूपसामान्यसमनियतस्याचत्वादेर्जातिरूपस्याचपदार्थत्रय-साधारणस्यापि शक्यतावच्छेदकत्वशक्यत्वान्यतराङ्गीकारात् सिद्ध-मिति भाष्यार्थमन्ये सूत्रारम्भेऽपीदमावश्यकम् एकरूपेणैव सर्वार्थ-बोधादितिभाव इति बोध्यम्॥ नन्विदानीन्तनमाषस्य षोडशभाग-त्वाभावात् कथं संख्यासामान्यमत आह

पुरेति॥ (भा)

व्यपदिश्यते इति। (कै)

---

[1] नार्थत्वोपपत्तिः। इ॥

गतिः साहचर्य्यात्। वा॥ आकृतावारम्भणादीनां सम्भवो नास्तीति कृत्वाकृति-सहचरिते द्रव्य आरम्भणादीनि भविष्यन्ति॥ न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः। वा॥ न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्यादित्यवद्विषयो भविष्यति। तद्यथा। एक आदित्योऽनेकाधिकरणस्थो युगपदुपलभ्यते॥ विषम उपन्यासः। नैको द्रष्टानेकाधिकरणस्थमादित्यं युगपदुपलभते॥ एवं तर्हीतीन्द्रवद्विषयः। तद्यथा। एक इन्द्रोऽनेकस्मिन्

प्याकृतौ समुच्चयोपपत्त्या विग्रहो न विरुध्यते॥ क्रियासामान्यादिति। भा। भिन्नासु क्रियासु अभिन्नप्रत्ययाभिधाननिमित्तं यत्सामान्यं तदेव द्रव्येष्वपि तन्निमित्तं भवति। यथा पाचक इत्याश्रयान्तरगतमपि हि सामान्यं समवेत समवायाद् द्रव्य उपकरोति। यथा गौरिकादिगतं लौहित्यं संयुक्तसमवा-यात् पटे लौहित्य प्रत्ययमादधाति। पुराकल्प इति। भा। पुराकल्पप्रसि-द्धोऽर्थः सम्प्रतिनिमित्ताभावेऽपि तथैव व्यपदिश्यते॥ माषसंवद्य इति। भा। तत्र षोडशभागत्वेन माषः प्रसिद्धः तथैव कार्षापणे माषः षोडशभाग इति षोडशभागत्वं नाम सामान्यमुपादत्ते माषशब्द इति सिद्धमेकशब्दत्वम्॥

आरोपादिति भावः॥ [1]माषसम्बद्यः माषः षोडशभागफलरूपः॥ कार्षापणे माषः (कै)। पञ्च गुञ्जामितः षोडशो भागः तयोः षोडशभागत्वेन सामान्येन सर्वेषु माषत्वव्यवहारः॥ इदानीं त्वष्ट-गुञ्जामिते माषे षोडशत्वमारोप्य तथा प्रयोग इति भावः॥ ननु संख्यागतं सामान्यं संख्याशब्दप्रवृत्तावेव कारणमत आह

संख्यैवेति॥ (कै)

तत्संख्येति। (कै)

संख्यामूलकत्वादित्यर्थः॥

अभिन्नप्रत्ययः। (कै)

एकाकारप्रत्ययः॥

१ माषसम्बद्यः क–भा॥ माषशंवद्यः द:–भा॥

क्रतुशत आहूतो युगपत् सर्वत्र भवति। एवमाकृतिर्युगपत् सर्वत्र भविष्यति॥ अविनाशोऽनाश्रितत्वात्। वा॥ द्रव्यविनाशः आकृतेरविनाशः। कुतः। अनाश्रितत्वात्। अनाश्रिताकृतिर्द्रव्यम्॥ किमुच्यते। अनाश्रितत्वादिति यदिदानीमेवोक्तमधिकरणगतिः साहचर्यादिति॥ एवं तर्ह्यविनाशोऽनैका-त्म्यात्। द्रव्यविनाश आकृतेरविनाशः। कुतः। अनैकात्म्यात्। अनेक आ-त्माकृतेर्द्रव्यस्य च। तद्यथा। वृक्षस्थोऽवतानो वृक्षे छिन्नेऽपि न विनश्यति॥

सङ्ख्यासामान्यादिति। भा। सङ्ख्यैव सामान्यमभिन्नप्रत्ययहेतुत्वात्॥ ननु षोडशसङ्ख्यापूरणत्वं नाम यत्सामान्यं तत्सङ्ख्यामूलत्वात्सङ्ख्यासामान्यमुच्यत इत्यदोषः। अथ डित्था इति भिन्नेषु संज्ञिष्वेकाकृत्ययोगात् कथमेकशब्द-वाच्यत्वम्। उच्यते। भिन्नडित्थशब्दगतं डित्थशब्दत्वं नाम यथा शब्दे स्व-भिन्नप्रत्ययाभिधानहेतुः तथा सोऽयमिति शब्दार्थयोरभेदाध्यवसायादध्यस्त डित्थशब्देषु संज्ञिष्वपि सम्बन्धिसम्बन्धादभिन्नप्रत्ययाभिधाननिमित्तमिति

अभिधानम्। (कै)

शब्दप्रयोगः॥

परोक्षत्वेति। (कै)

इदं बुद्धिविषयतावच्छेदकावच्छिन्नत्वादीनामुपलक्षणम्॥

[1]तार्किकाः। (कै)

वैशेषिकादयः॥

निरुपाख्यत्वम्। (कै)

विशिष्टस्य निर्वक्तुमशक्यत्वं तत् समनियतो जातिविशेषोऽभावत्वमेव सर्वत्र [2]इत्यलम्॥

---

१ तैर्थिकाः। इ॥ उपलब्धकैयटे तु "तार्किकदर्शनम्" इति पाठोऽस्ति॥
२ इत्यन्ये। इ॥

वैरूप्यविग्रहौ द्रव्यभेदात्। वा॥ वैरूप्यविग्रहावपि द्रव्यभेदाद्भविष्यतः॥ व्यर्थेषु च सामान्यात् सिद्धम्। वा॥ विभिन्नार्थेषु च सामान्यात् सिद्धं सर्वम्। अश्नोतेरक्षः। पद्यतेः पादः। मिमीतेर्माषः। तत्र क्रियासामान्यात् सिद्धम्॥ अपरस्त्वाह। पुराकल्प एतदासीत् षोडशमाषाः कार्षापणं षोडशपलाश्च माषशंवध्यः। तत्र सङ्ख्यासामान्यात् सिद्धम्॥

सिद्धमेकशब्द वाच्यत्वम्। तथा ताविव्येताविति परोक्षत्वप्रत्यक्षत्वादिकं सामान्यमाश्रयनीयम्। गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्ययहेतुसामान्यानामपि सामान्यमाश्रयितव्यम्। अथवा निःसामान्यानि सामान्यानीति तार्किकदर्शनं न वैयाकरणैर्नियोगत आस्थेयम्। कार्यान्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति। अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं सामान्यं कल्पनीयम्। तदेवं सर्वत्राकृतिसद्भावात् सिद्धमेकशब्दत्वम्॥

[1]वृद्धो यूना तल्लक्षणश्चेदेव विशेषः।

१। २। ६५॥

अजवर्करादीनां वृद्धयुवसंज्ञकत्वाभावादाह

उभयेति॥ (कै)

अथवेति। (कै)

स्वशास्त्रीयवृद्धसंज्ञकन्तु न गृह्यते व्याख्यानादिति बोध्यम्॥ सामान्यविशेषवाचिनां सहविवक्षाभावाद्द्वन्द्वाभावेन तदपवादे एकशेषस्याप्यप्राप्तेराह

अजोष्ट्रेति। (कै)

यद्यपि करभकिशोरशब्दौ शावकवचनौ तथापि भाष्यप्रामाण्यात् तरुणवचनौ बोध्यौ॥ "वर्करस्तरुणोऽजः"॥

समुच्चयाभावादिति। (कै)

सहविवक्षाभावादित्यर्थः॥

---

१ इह कस्मान्न भवति अजस्य वर्करस्य। अश्वस्य किशोरस्य। उष्ट्रस्य करभस्येति। तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः। तल्लक्षण एव विशेषो यत् समानायामाकृतौ शब्दभेदः॥ वृद्धो गोत्रम्। अपत्यमन्तर्हितं वृद्धम् इति पूर्वाचार्यैः सूचितत्वात्॥

वक्ष्यमाणम्। (कै)

यत्रोर्द्ध्वप्रकृतेरित्यादि॥

उत्तरत्र। (कै)

[1]"भ्रातृपुत्रावि"त्यत्र॥

---

[2]स्त्री पुंवच्च। १। २। ६६॥

टाबादीति। (कै)

क्तिनादीनां तु न ग्रहणं "वृद्धो यूना" (१। २। ६५) इत्यधिकारात्। अत्र पक्षे "पुंवद्" इति सामर्थ्यादभावातिदेशः॥

---

१ अ १। पा २। सू ६८॥

२ इदं सर्वेष्वेव स्त्रीग्रहणेषु विचार्य्यते स्त्रीग्रहणे स्त्रीप्रत्ययग्रहणं वा स्यात् स्त्र्यर्थग्रहणं वा स्त्रीशब्दग्रहणं वेति। किं चातः। यदि प्रत्ययग्रहणं वा शब्दग्रहणं वा गार्गी च गार्ग्यायणौ च गर्गाः केन यशब्दो न श्रूयेत। "अस्त्रियाम्" इति हि लुग् (२। ४। ६४) उच्यते। इह च गार्गी च गार्ग्यायणौ च गर्गान् पश्य "तस्माच्छसो नः

---

२ इदमिति। भा। यदि स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञायते तदा स्त्र्यधिकारविहितटाबादि प्रत्ययग्रहणं ततश्चायमर्थः। पुंवत् स्त्रीप्रत्ययो न भवतीत्यभावातिदेशः क्रियते। स्वरितत्वाभावे तु शब्दग्रहणमर्थग्रहणं वा। तत्र शब्दग्रहणपक्षे स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवतीति

शब्देति। (कै)

स्त्र्यर्थवृत्तिशब्देत्यर्थः। "वृद्धे"ति विशेषणसामर्थ्यात् स्वरूपग्रहणं नेतिभावः॥

दोष इति। (कै)

[१]"यञञोश्च" इत्यत्र [२]"अस्त्रियाम्" इत्यनुवृत्तेः॥

पर्युदासे त्विति। (कै)

"सर्वं वाक्यं सावधारणम्" इति न्यायेन "अस्त्रियाम्" एव वर्त्तमानस्येत्यर्थात्। पर्युदासेऽपि दोष इत्यन्ये॥

पुं बहुत्वे इति। (कै)

पुंमात्रगत बहुत्वे इत्यर्थः॥

---

१ अ २। पा ४। सू ६४॥

२ तद्राजस्य बहुषु तेनैवास्त्रियाम् (२।४।६२) इत्यतः अस्त्रियाम् इत्यनुवर्त्तते॥ "यञिञोश्च" (४।१।१०१) इत्युपलब्धविवरण-पुस्तकेऽस्ति तत्तु न सम्यक्।

पुंसि" (६।१।१०३) इति नत्वं न प्राप्नोति॥ अथार्थग्रहणं न दोषो भवति। यथा न दोषस्तथास्तु॥ इह कस्मान्न भवति। अजा च वर्करश्च। वड़वा च किशोरश्च। उष्ट्री च करभश्चेति। तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः। तल्लक्षण एव विशेषो यत् समानायामाकृतौ शब्दभेदः॥

स्त्रीत्वमनिवृत्तमेव। अर्थग्रहणपक्षे तु पुमर्थातिदेशे तदर्थप्रतिवद्धानां कार्य्याणां सिद्धिः। तत्रार्थस्य प्राधान्याददुष्टत्वाच्चार्थपक्ष एवाश्रीयते॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम्।१।२।६८॥

यच्चैकेति। (कै)

समानेत्यर्थः॥

अन्यत्त्विति। (कै)

अन्यक्तमित्यर्थः॥

वैरूप्यमिति। (कै)

स्वार्थे ष्यञ्॥

इत्येतद्वर्जयित्वेति। (कै)

"भ्रातृपुत्रौ" [१]"पितामाता" [२]"श्वशुरः श्वश्रा" इत्येतेषां ज्ञापक–

---

१ अ १। पा २। सू ७०॥ २ अ १। पा २। सू ७१॥

पुमान् स्त्रिया। १। २। ६७॥ इह कस्मान्न भवति। हंसश्च वराटा च। कच्छपश्च डुली च। ऋष्यश्च रोहितश्चेति। तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः। तल्लक्षण एव विशेषो यत् समानायामाकृतौ शब्दभेदः॥

अस्त्रियामितीति। भा। यदायं प्रसज्यप्रतिषेधः तदा दोषः। पर्युदासे तु शिष्यमाणः शब्दो निवर्त्तमानार्थाभिधायीत्यस्ति स्त्रीसदृशोऽर्थ इति लुक् सिध्यति॥ गर्गान् पश्येति। भा। स्त्रीत्वस्यानिवृत्तत्वात्। नायं पुम् बहुले शस् उत्पन्न इति नत्वं न सिध्यति॥

त्वात्। "[१]नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्यत्र तदनुवृत्तेश्च "त्यदादीनि" (१। २। ७२) इत्यस्यैव वर्जनमुक्तम्। तत्र हि सर्वग्रहणसामर्थ्यात् तन्निवृत्तिरितिभावः॥ ननु स्त्रीगोव्यक्तिपुंगोव्यक्तिवाचकयोर्गौश्च गौश्च इत्येकशेषानापत्तिस्तल्लक्षणविशेषाभावात् अत आह

पदान्तरगम्येऽपीति॥ (कै)

तल्लक्षणविशेषे इति॥ (कै)

स्त्रीत्वपुंस्त्वरूपविशेषे इत्यर्थः॥

एतौ गावौ इति। (कै)

तल्लक्षण इत्यस्य तद्रूप इत्येवार्थः॥

ऊर्ध्वम् (भा)

इत्यादेश्च प्रकृत्यतिरिक्तशब्दकृत एव चेत्तद्रूप विशेष इत्यर्थः॥ सूत्रेऽप्येव इत्यस्य प्रकृत्यतिरिक्तकृत इत्यादिप्रकृत्यतिरिक्तकृत एव तद्रूपो विशेषश्चेदित्यन्वयः॥ तद्रूप इत्यस्य वृद्धत्वरूपः। स्त्रीत्वपुंस्त्वरूप इत्यर्थः॥ प्रकृतिश्चात्र स्त्रीत्वाद्यर्थकप्रत्ययस्य गृह्यते इति बोध्यम्॥ न च इन्द्रेन्द्राण्यौ इत्यादावप्यस्य प्रवृत्तिः प्राप्नोति। आनुकः प्रकृत्यवयवत्वेन तत्कृतापत्र स्त्रीत्वप्रतीतिरिति न दोषः। एवं हि "यत्रोर्ध्वम्" इति भाष्ये एवोत्थानो भवति। अत्रस्वारस्यं च नेति। ऊर्ध्वं प्रकृतेर्विशेषश्चेत्तल्लक्षण एव इत्यन्वयेन तदितर-

---

[१] अ १। पा २। सू ६९॥

कृतविशेषविरहरूपे विशेषाभावे तात्पर्य्यान्नदोषः। स चेह विशेष्या-भावादस्त्येवेत्यन्ये॥ भाष्ये

[1]असरूपाणाम् (भा)

इत्यनेन उक्तचिसूत्रीं प्रत्याचष्टे॥

गर्गापत्यत्वमिति। (कै)

गोत्रयुवसाधारणम् अपत्यत्वेनैव गोत्रादिप्रत्ययेभ्यो बोधात् युवत्वादिविशेषानादरेण गार्ग्यश्च गार्ग्यश्च इति गोत्रशब्दयोरेव सरूपैकशेषेण सिद्धमित्यर्थः॥ नन्वेवमन्यतरस्यपुंवत्वं न प्रतीयेतेत्यत आह

आरभ्यमानेऽपीति॥ (कै)

नार्थ इति। (कै)

[2]"वृद्धो यूना" इत्यादिनेत्यर्थः॥ ननु प्रकरणाद्यनपेक्ष्य युवत्वा-दिप्रतिपादनेच्छायां द्वन्द्वः स्यादत आह

द्वन्द्वोऽपीति। (कै)

सह विवक्षायां द्वयोः प्रयोगाभाव एवानभिधानादिति भावः॥ ननु स्त्र्यभिधाननिमित्तस्त्रीप्रत्यय निवृत्तये "[3]पुमान् स्त्रिया" इत्यावश्यकम् अत आह

---

१ असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात् सामा-न्यस्य च विवक्षितत्वात् सिद्धम्॥

२ अ १। पा २। सू ६५॥ ३ अ १। पा २। सू ६७॥

स्त्रीति॥ (कै)

इदानीं[1] "पुमान् स्त्रिया" इत्यस्य सार्थक्यं शङ्कते भाष्ये

पुमान् स्त्रियेहेति। (भा)

उक्तरीत्यात्रैकशेषस्य साधयितुमशक्यत्वादेतदर्थमेव तत्सूत्रं कस्मान्न भवतीति प्रश्नः। कृतेऽपि सूत्रेऽत्र न प्राप्नोतीत्युत्तरं तत्र प्रश्नमुपपादयति

अस्त्यत्र प्रकृतेरिति। (कै)

ब्राह्मणरूपायावत् सरूपाश्च इत्यर्थः॥

विशेषः (कै)

प्रधानत्वरूपः॥

एकशेषनिमित्ते इति। (कै)

सारूप्योपलक्षणमेवात्र निमित्तत्वम्॥

[2]**लिङ्गस्याविभक्तिपरस्येति** (भा)

---

१ अ १। पा २। सू ६७।

२ "ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादनेकशेषः। वा। ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादेकशेषे न भविष्यति" इति पाठो बहुषु दाक्षिणात्यभाष्यपुस्तकेषु वार्त्तिकपुस्तकेषु चास्ति॥ "ब्राह्मणवत्सा ब्राह्मणीवत्सयोर्लिङ्गस्य अविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः। वा। ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य अविभक्तिपरस्य विशेषवाचकत्वादेकशेषो न भविष्यति" इति पाठो बहुषु मध्यदेशीयभाष्यपुस्तकेषु दृश्यते॥

भाष्ये पाठः। "लिङ्गस्य" लिङ्गबोधकप्रत्ययस्य॥ कैयटे "ऽप्यविभक्तिपरस्ये"ति प्रतीकग्रहणं तद्ध्वनयन् भाष्ये आह

यत्र लिङ्गं विभक्तिपरमेवेति। (भा)

नात्र लिङ्गं विभक्तिपरमेवेति (भा)

च हेतोः पञ्च वृत्तित्वम्॥ अयमस्य सूत्रस्यार्थः। यत्र प्रकृत्यतिरिक्तैकशेषनिमित्तविभक्तिपरशब्दगम्य एव स्त्रीत्वरूपो विशेषस्तत्रैकशेषो विभक्तौ सारूप्यं च लिङ्गबोधकातिरिक्तकृतमेव सामर्थ्याद्बोध्यम्॥

स्त्रीपुंसकृत इति। (कै)

स्त्रीपुंसबोधकशब्दकृतस्तद्गम्यो विशेषः स्त्रीत्वादिरूप इत्यर्थः॥

[1]इत्वमप्यत्रेति। (कै)

सति इत्वे स्त्रीत्वप्रतीतेरित्यर्थः॥ भाष्ये "लिङ्गम्" लिङ्गबोधकः शब्दः॥

शब्दो या स्त्रीति। (भा)

सामर्थ्यात् तल्लक्षण इत्यस्य तन्निमित्तक इत्यर्थः॥ "अर्थ स्त्री" पक्षेऽपि [2]एवमेव तदर्थं मन्यते तदाह

न च तदिति॥ (कै)

नात्र यणादेशस्येति। (कै)

अर्थशब्दान्यतरस्त्रीकृत एव यत्र विशेषो नान्यकृत इत्यर्थ इति भावः॥

---

१ "इत्वमप्यस्य" इत्युपलब्धविवरणे पाठोऽस्ति॥

२ एव तदर्थं मन्यते। इ॥

शब्दस्त्रीनिमित्तत्वेनेति। (कै)

स्त्रीप्रत्ययत्वेनेत्यर्थः ॥

नाचेति। (कै)

यौगपद्यग्रहणे तु उभयनिमित्तकस्य क्वाप्यभावेन सूत्रासङ्गतिरेव स्यादिति भावः ॥ भाष्ये

शब्दार्थौ या स्त्रीति। (भा)

सा आश्रीयते इति शेषः ॥ नन्वेवमपि पटू इति न सिध्यति तत्राह

[१]**सद्भावेन चेति॥** (भा)

तद्व्याचष्टे

तद्भावभावित्वादिति॥ (कै)

भाष्ये

एवं च कृत्वेति। (भा)

अत्रार्थस्त्रीकृत एव विशेष इति भावः ॥

एवं तर्हीति। (भा)

स्त्रीरूपार्थस्य विभक्तिपरत्वं वक्तुमशक्यमिति भावः ॥

प्रधान स्त्रीपुंसकृत इति। (कै)

तत्कृत एवेत्यर्थः ॥

---

१ "कथं तर्हि शब्दार्थौ या स्त्री तद्भावे न च तल्लक्षणो विशेष आश्रीयते" इति काशीस्थभाष्यपुस्तके। दाक्षिणात्यभाष्यपुस्तके इङ्गलण्डीयभाष्यपुस्तके च "सद्भावेन च" इत्यस्ति ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतर-स्याम्। १। २। ६९॥

नपुंसकपर्य्यायेणेति

इदं चिन्त्यम्। [1]"शुक्लानि" इत्यादौ नपुंसके प्रातिपदिकवैरूप्यात् तस्मात् अप्राप्ते विधिरयमित्येव वक्तुमुचितम्॥

[2]प्रधाने कार्य्यसंप्रत्ययाद् (भा)

इत्यस्य कार्य्यस्यैकशेषस्यैकावस्थानरूपस्य प्रधाने नपुंसके संप्रत्ययात्तस्यैव शेष इति नार्थः। योगप्रत्याख्याने हेतुत्वानुपपत्तेरत आह

शब्देनेति॥ (कै)

नपुंसकस्यैवेति। (कै)

प्रधानन्यायेनेत्यादिः। प्रधानन्यायेन नपुंसकत्ववैशिष्ट्येनैव स्त्रीपुंसार्थस्यापि प्रतीतिरिति भावः॥

सा चेति। (कै)

---

१ शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानी शुक्लानि॥

२ प्रधाने च कार्य्यसंप्रत्ययाच्छेषः। वा। प्रधाने कार्य्यसंप्रत्ययाच्छेषो भविष्यति। किं च प्रधानम्। नपुंसकम्। कथं पुनर्ज्ञायते नपुंसकं प्रधानमिति। एवं हि दृश्यते लोके। अनिर्ज्ञातेऽर्थे गुणसन्देहे च नपुंसकलिङ्गं प्रयुज्यते॥

वृद्धिह्रासयोः स्थितेरपि सत्त्वादिति भावः ॥ नन्वनिर्ज्ञाते कथं प्रश्नोऽत आह

सामान्यरूपेणेति ॥ (कै)

भाष्ये

अनिर्ज्ञातेऽर्थे गुणसन्देहे चेति । (भा)

गुणसन्देहमूलकेऽनिर्ज्ञातार्थविषये प्रश्नवाक्ये इत्यर्थः ॥

शब्दैकगोचरत्वमिति । (कै)

तत्तच्छब्दमात्रबोध्योपचयादिरूपत्वमेवेत्यर्थः । ततश्च नपुंसकस्य प्रजननासमर्थस्यापि पुंस्यन्तर्भावोऽस्तीति भाव इति विवरणकृतः ॥

स्त्री वा पुमान् वा (भा)

इत्यस्य स्त्रीशब्दवाच्यं वा इत्यर्थः ॥ एतद्भाष्यस्य प्रायेणेत्यादिरित्यन्ये ॥ नन्वनेककोटिकस्यैव सन्देहस्य दृष्टत्वेनेदृक् सन्देहाकारोऽनुचितोऽत आह

यच्च दूरादिति ॥ (भा)

इत्यस्मिन्नर्थे इति । (कै)

इव शब्दो भिन्नक्रम इति भावः ॥

दृष्टान्तत्वेनेति । (कै)

स्त्रीविषयो रूपशब्दो नपुंसके स्त्रिया अन्तर्भावे दृष्टान्तत्वेनोपात्त इत्यर्थः । एवं च व्यापकत्वेन नपुंसकस्य प्राधान्यात् तद्विवक्षायां नपुंसकप्रयोगः ॥

आधिक्यादिति। (कै)

यदि विशेषस्तदा नपुंसकत्वस्त्रीत्वपुंस्त्वकृत एवेत्यर्थ इति भावः ॥ भाष्ये

[1]आकृतिवाचित्वादिति। (भा)

यदा आकृतौ स्वगतसंख्याविवक्षा तदैकवचनं यदाश्रयगत संख्यारोपस्तदापि द्विवचनादीति बोध्यम्। एतेन [2]सरूपसूत्रविषयेऽप्येकवचनान्तत्वमनुमतं भगवतेति बोध्यम् ॥

---

[3]पिता मात्रा। १। २। ७० ॥

श्वशुरः श्वश्र्वा। १। २। ७१ ॥

भ्रात्रादीनां वैरूप्याद् भिन्नार्थत्वाच्चैकशेषाप्राप्तेः "पुमान्-

---

१ आकृतिवाचित्वादेकवचनम्। वा। आकृतिवाचित्वादेकवचनं भविष्यति। यदा द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यतः ॥

२ अ १। पा २। सू ६४ ॥

३। किमर्थमिदमुच्यते। न पुमान् स्त्रिया (१।२।६७) इत्येव सिद्धम्। भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशः। भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशो भवति। भ्रातृपुत्रपितृ-

स्त्रिया” इत्यत्रापि [1]सरूपाणाम् इत्यनुवृत्तेः प्रश्नानुपपत्तिमाशङ्क्याह

हत्तीति ॥ (कै)

भाष्ये

न [2]पुमान् स्त्रियेति । (भा)

सिद्धमिति । (भा)

“[3]सरूपाणाम्” इत्यपेक्षया परत्वादयमेव न्याय्य इति भावः ॥

स्वस्रादिष्वपीति । (कै)

एकापत्यत्वादेः प्रवृत्तिनिमित्तस्य सत्वात् इति भावः । एवं भ्राता च भ्रात्री च इति विग्रहे “पुमान् स्त्रिया” इत्येव सिद्ध-मिति तात्पर्य्यम् ॥ भाष्ये उत्तरयति

भ्रातृपुत्रे (भा)

त्यादि ॥ तद्व्याचष्टे

---

१ अ १ । पा २ । सू ६४ ॥ २ अ १ । पा २ । सू ६७ ॥
३ अ १ । पा २ । सू ६४ ॥

श्वशुराणां कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात् सिद्धम् । वा । यदि तावद् विभर्त्तीति भ्राता । तथा यदि **पुनाति प्रीणातीति वा पुत्रः** दुहितरि अप्येतद्भवति । तथा यदि पाति पालयतीति वा पिता मातर्य्यप्येतद्भवति । तथा यदि आश्वाशयः श्वशुरः श्वश्र्वामप्येतद्भवति । **दर्शनं वै हेतुः ।** न हि स्वसरि भ्रातृशब्दो दृश्यते । **दर्शनं हेतुरिति चेत्तुल्यम् ।** वा । दर्शनं

[1]भिन्नं प्रवृत्ति निमित्तमिति। (कै)

एतदेव भाष्ये "कारण" शब्देनोक्तम्। पुंस्त्वविशिष्टमेकापत्यत्वं भ्रातृशब्दस्य स्त्रीत्वविशिष्टं स्वसृशब्दस्येत्यर्थः। तयोः सारूप्याभावात् "पुमान् स्त्रिया" (१ । २ । ६७)। इत्यस्याप्राप्तिरिति भावः॥

प्रत्याख्यानवाद्याह

इति चेत्तुल्येति॥ (भा)

आरम्भवाद्याह

दर्शनं वै हेतुरिति॥ (भा)

प्रत्याख्यानवाद्याह

दर्शनं हेतुरिति
चेत्तुल्यमिति। (भा)

१ उपलब्धकैयटपुस्तके "भिन्नं च प्रवृत्तिनिमित्तम्" इति पाठोऽस्ति॥

हेतुरिति चेत्तुल्यमेतद्भवति। स्वसर्य्यपि भ्रातृशब्दो दृश्यतां तुल्यं हि कारणम्। न वा एष लोके सम्प्रत्ययः। न हि लोके भ्रातानीयतामित्युक्ते स्वसानीयते॥ तद्विषयं च। वा। तद्विषयं चैतद्द्रष्टव्यं भवति स्वसरि भ्रातृत्वम्। किं विषयम्। एकशेष-विषयम्॥ युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः। बाढं युक्तम्। अन्यत्रापि तद्विषयदर्शनात्। वा। अन्यत्रापि नियतविषयाः शब्दा

दर्शनं हेतोस्तुल्यत्वात्तत्रापि दर्शनं स्यादित्यर्थः ॥ [1]"शास्त्रारम्भेण" इति पाठः ॥

नियम्यते (कै)

उत्पाद्यते ॥ एवं च [2]भ्रातृत्वपुत्रत्वपितृत्वश्वशुरत्वादीनां [3]स्वसृदुहितृमातृश्वश्रूत्वारोपेणैकशेषविषये तत्तद्रूपेणैव स्वस्रादीनां बोध इति [4]स्वरूपसूत्रादिप्रत्याख्यानेऽपि न दोष इति तत्त्वम् ॥ एवं प्रत्याख्याता त्रिसूत्रीति दिक् ॥

---

१ एवमनारब्धेऽप्येकशेषे नित्यत्वाच्छब्दार्थस्य सम्बन्धस्य सहविवक्षायामेव भ्रातृशब्दः स्वसुरभिधायको भविष्यति। न ह्यविद्यमानसम्बन्धस्य शक्तिः **शास्त्रेण** नियम्यते। अनभिधानाच्च भ्रातृपुत्र शब्दयोः स्वसृदुहितृभ्यां द्वन्द्वाभावः। मातापितरौ श्वश्रूश्वशुराविति द्वन्द्व इष्यत एव ॥

२ भ्रातृपुत्रत्व — — — इति पाठोऽस्ति इ-पुस्तके ॥

३ "स्वसृदुहितृश्वश्रूत्वारोपेणैकशेषविषये" इति पाठोऽस्ति इ-पुस्तके ॥

४ अ १ । पा २ । सू ६४ ॥

दृश्यन्ते। तद्यथा। समानि रक्ते वर्णे गौर्लोहित इति भवत्यश्वः शोण इति। समानि च काले वर्णे गौः कृष्ण इति भवत्यश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति ॥

त्यदादीनि सर्वैर्नित्यम् । १ । २ । ७२ ॥

द्व्याश्रय इति । (कै)

त्यदादितद्भिन्नपदयोरेकशेषेण त्यदादिपदाश्रयणाद्वापि द्व्याश्रयसद्भावो बोध्यः । त्यदादीनामित्यर्थः ॥

पुंनपुंसकत इति । (भा)

पुंनपुंसकयोरित्यर्थः । सहविवक्षितपुंनपुंसकवशेनेति भावः ॥

पुंस्त्वमिति । (कै)

वचनं त्वभिधेयवशेन सिद्धमिति प्रसङ्गोच्चारितो वचनशब्दः । "शब्दपरेति" वार्त्तिके इति शेषः । ध्वनितं चेदं "[1]नपुंसकमनपुंसकेन" इति सूत्र तत्प्रत्याख्यानव्याख्याभ्याम् इदं वचनं त्यदादिभिः सजातीयविजातीयानां त्यदादीनां त्यदादिभिन्नानां च सह विवक्षायामेकशेषप्रवृत्तिविषयम् अक्षरस्वारस्येन तथैव लाभात् । न चैवं "गाव इमाश्चरन्ती"ति [2]उत्तरसूत्रस्थभाष्यप्रयोगे 'इमा' इत्यनुपपन्नं स्यात् । निषेधवार्त्तिके द्वन्द्वपदेनैकशेषस्यापि ग्रहणात् ॥

तल्लिङ्गस्य सिद्धत्वात् । (कै)

---

१ अ १ । पा २ । सू ६९ ॥
२ अ १ । पा २ । सू ७३ ॥

प्रधानतन्त्रत्वाद्गुणानाम् ॥ ननु नेह गवादिवत् समान्यमर्थ इत्यत आह

वस्तुमात्रमिति। (कै)

अविवक्षितस्त्रीत्वपुंस्त्वाद्यवान्तर[1]विशेषं परोक्षत्वाद्यनुगतीकृतं वस्तुमात्रमित्यर्थः। एवं चैकेनैव तच्छब्देनोभयोः प्रतीतिः॥

सिद्धेति। (भा)

एकशेषफलं सिद्धमित्यर्थः॥ लिङ्गमपि लोकत एव सिद्धं तत्र तात्पर्य्यतो निर्णय इति भावः॥

[2]सति सूत्रे इति। (कै)

"त्यदादीनि" इत्यनेनानुपूर्वीविशेषयुक्तानां निर्देशात्। असति तु वचने निर्णायकस्य विप्रतिषेधस्य न प्रवृत्तिरिति भावः। [3]एतन्मूलकमेव पठ्यते "त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते" इति "परस्य च" इति भाष्ये। परस्यैवेत्यर्थः॥ आरम्भवादिनापि परस्योभयवाचित्वमङ्गीकार्य्यमित्यर्थः॥

तद्देवदत्ताविति। (कै)

अवान्तरधर्मविशेषविवक्षायां तत्प्राप्तिरिति बोध्यम्॥ भाष्ये

---

१ 'वि' इति नास्ति क पुस्तके॥

२ उपलब्ध कैयटपुस्तके "सूत्रे सति" इत्यस्ति॥

३ परस्य शेषं वक्ष्यामीति। परस्य चोभयवाचित्वात्। उभयवाचि परम्॥

[१]उत्कालिताः (भा)

निष्कासिताः। पुरुषायेतीत्यर्थः। विनाशितपुंस्का इत्यर्थं कश्चित्॥ तन्न उत्तरसूत्रस्थ "[२]पुंस उत्कालयितुम्" इति भाष्यासङ्गतेः॥ किमर्थं पुंसां निःकाशनमत आह

वाहाय च इति। (भा)

प्रायेण बलीवर्द्द एव वाह्यन्ते विक्रीयन्ते च॥

स्त्रिय एवेति। (भा)

ततश्च गोशब्दस्य स्त्रीत्वसमानाधिकरणं गोत्वं प्रवृत्तिनिमित्तं पुंस्त्वसमानाधिकरणं चेति। नानार्थो गोशब्दः तत्राद्यः प्रसिद्धः। अन्यस्तु कश्चिदेव। एवं च गोशब्दस्त्रीगवीणामेव वाचकः प्रायेण। क्वचिदेव तात्पर्यग्राहकवशेन पुंगवानां वाचको यथा "[३]एतान्

---

१ उपलब्ध भाष्यपुस्तके "उत्कालितपुंस्का" इति पाठोऽस्ति॥

२ कः पुनरर्हत्यग्राम्यागां पुंस उत्कालयितुं ये गृहीतुमशक्याः कुत एव वाहाय च विक्रयाय च (१।२।७३)॥

३ प्रथमयोः पूर्वसवर्णः (६।१।१०२) इति सूत्रस्थ "नकाराभावस्य तस्मादित्यनन्तरनिर्देशात्" (वा) इति वार्त्तिकव्याख्यानावसरे भगवता जगद्गुरुणा श्रीमत्पतञ्जलिनोक्तम्। "न त्वस्य चाभावः (६।१।१०३)। वृक्षान् प्लक्षान्। किं कारणम्। तस्मादित्यनन्तरनिर्देशात्। तस्मादित्यनेनानन्तरो योगः प्रतिनिर्दिश्यते। इह माभूत्। एतान् गाः पश्य" अत्र बहुविधपाठो दृश्यते। एकस्मिन् भाष्यपुस्तके "एतान् गाः पश्य" इति। अपरैकस्मिन् "एतान्

गाश्चतुरो बलीवर्द्दान् पश्येति" "प्रथमयोः" (६ । १ । १०२) इति सूत्रस्थभाष्यप्रयोगे "गौर्वाहीक" इत्यादौ चेति भावः। एवं बलीवर्दसमभिव्याहारात् गोशब्दस्तदतिरिक्तपर इति कथा चिन्त्या। वाहाद्यर्थं निष्काशितपुरुषा एव गावः गोपदवाच्या॥ ननु तत्सहिता इत्यर्थो भाष्यस्य। भाष्यस्य "एतान् गा" इत्युदाहरणे "बलीवर्दान्" इति तु अवस्थाविशेषप्राप्तत्वबोधनाय इत्याहुः॥

ततश्चाचेति। (कै)

अत्रोदाहरणे पुंतात्पर्य्यग्राहकरहिते इत्यर्थः॥ भाष्यात् लोकाच्च गोशब्दव्यवहारः प्रायेण स्त्रीगवीष्वेवेति द्रष्टव्यम्॥

समुच्चय इति। (कै)

सहविवक्षेत्यर्थः॥

गतत्वादिति। (कै)

वस्तुमात्रविवक्षयेत्यर्थः॥

सामान्योपक्रमे इति। (कै)

न प्रथमत एव विशेषावगमः। तथा सति सामान्यविशेष-वाचिनोरुभयोः प्रयोगवैयर्थ्यं तस्मात् सामान्योपक्रमे विशेषाभिधान-

---

गाश्चरतो बलीवर्द्दान् पश्येति" इति। अन्यस्मिन् "एतान् गाश्च-तुरो बलीवर्दान् पश्येति" इति। परम् "एतान् गाश्चतुरो बलीवर्दान् पश्येति" इत्यनेन नागेशभट्टीयमहाभाष्यपुस्तके एवमासीद् इत्यनुमीयते॥

मित्यर्थः ॥ ननु [1]वाक्यं विशेषणविशेष्यविषयं [2]द्वन्द्वस्तूभयपदार्थप्रधानविषय इति कथमेतदत आह

१ आख्यातं साव्ययकारकविशेषणं वाक्यम् । वा । आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम् ॥ साव्ययम् । उच्चैः पठति । नीचैः पठति ॥ सकारकम् । ओदनं पचति ॥ सकारकविशेषणम् । ओदनं मृदुविशदं पचति ॥ सक्रियाविशेषणं चेति वक्तव्यम् । सुष्ठु पचति । दुष्ठु पचति ॥ अपर आह । आख्यातं सविशेषणमित्येव । सर्वाणि ह्येतानि क्रियाविशेषणानि ॥ एकतिङ् । वा । एकतिङ्वाक्यसंज्ञं भवतीति वक्तव्यम् । ब्रूहि ब्रूहि । २ । १ । १ ॥

"संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली" अग्निपुराणम् । अ – ३३६ । श्लो – ६ ॥

२ इदं तर्हि प्रयोजनं द्वन्द्वो माभूदिति । एतदपि नास्ति प्रयोजनम् । **सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम् ।** वा । सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम् ॥ यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते शूद्राभीरं गोबलीवर्दम् तृणोलपम् इति न सिध्यति । नैष दोषः । इह तावच्छूद्राभीरमिति । *आभीरा जात्यन्तराणि । गोबलीवर्दमिति । गाव उत्कालितपुंस्का वाहाय च विक्रयाय च । स्त्रिय एवावशिष्यन्ते । तृणोलपमिति । **अपाम् उलपम् इति नामधेयम् ॥** तत्तर्हि वक्तव्यम् । न वक्तव्यम् । सामान्येनोक्तत्वाद्विशेषस्य प्रयोगो न भविष्यति । सामान्येनोक्तत्वात् तस्यार्थस्य विशेषस्य प्रयोगेण न भवितव्यम् । किं कारणम् । उक्तार्थानामप्रयोग इति ॥ न तर्हीदानीमिदं भवति तं ब्राह्मणमानय गार्ग्यमिति । भवति यदा नियोगतस्तस्यैवानयनं भवति । एवं तर्हि येनैवं खल्वपि हेतुना एतद्वाक्यं भवति तं ब्राह्मणमानय गार्ग्यमिति तेनैव हेतुना वृत्तिरपि प्राप्नोति । **तस्मात् सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीति वक्तव्यम् ॥**

* ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते । माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात् ॥

यथेति। (कै)

[१]"प्राच्यभरतेषु" इति तु सौत्रो निर्देशः। [२]"प्रमाणप्रमेये"त्यादि तु एतद्भाष्यरीत्या असाध्वेव इत्याहुः ॥

---

१ बह्वच इञः प्राच्यभरतेषु । २ । ४ । ६६ ॥

२ "अनित्योऽयं निषेधः ("सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम्" इति निषेधः) प्राच्यभरतेषु (२ । ४ । ६६) इति सूत्रनिर्देशाल्लिङ्गात् । तेन "प्रमाणप्रमेय" इत्यादिषु द्वन्द्वः सिद्धः । एतेन "अविद्यातच्चितो योगः षडस्माकमनादयः" "मत्स्यादौ तद्विशेषयोः" इत्यादि प्रयोगा व्याख्याताः" इति दीक्षितादयः ॥ "प्राच्यभरतेषु (२ । ४ । ६६) इति निर्देशात् सामान्यशब्दस्योपात्तविशेषातिरिक्तपरत्वे सह विवक्षासम्भवेन द्वन्द्वो भवत्येव। तेन गोवलीवर्दमित्यादि सिद्धिः" इति नागेशेनोक्तं शेखरे अत्र तु सौत्रत्वादित्युक्तं तेनैव ॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । न्याय—अ १ । आ १ । सू १ ॥ "चार्थे द्वन्द्वसमासः इति तद्भाष्ये ॥ "सर्वपदार्थप्रधानः समासो द्वन्द्व इति किमुक्तं भवति। सर्व एते प्रमाणादयो विज्ञेया इति। अन्यथा हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमाणादीनामविज्ञेयता स्यात्। यथा वचनं विग्रहः। यदेव निर्देशे वचनभेदोपादानेप्रयोजनं तदिहापि। द्रष्टव्यम्" इति न्यायवार्त्तिके ॥ अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः। प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः। प्रमाणादिशास्त्रयोः प्रतिपाद्य प्रतिपादकभावः। शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः। सम्बन्धः। तत्त्वं ज्ञायतेऽनेन इति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रम्। तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव सम्बन्ध इति सम्प्रदायविदः॥ अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः। यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानाम् अभेदान्न द्वन्द्वसम्भवस्तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोषः॥

[1] ग्राम्यपशुसंघेष्वतरुणेषु स्त्री । १।२।७३॥

स्त्री शब्देनेति । (कै)

अन्यथा "[2]पुमान् स्त्रिया" इति पुंसः शेषः स्याद् इत्यर्थः ॥

उभयेति । (कै)

मङ्क्ष्वेत्यादि ॥

---

१ अयमपि योगः शक्योऽवक्तुम् । कथं गाव इमाश्चरन्ति अजा इमाश्चरन्ति । गाव उत्कालितपुंस्का वाहाय च विक्रयाय च । स्त्रिय एवावशिष्यन्ते ॥ इदं तर्हि प्रयोजनं ग्राम्येष्विति वक्ष्यामीति । इह माभूत् । न्यङ्कव इमे शूकरा इम इति । कः पुनरर्हत्यग्राम्याणां पुंस उत्कालयितुं ये ग्रहीतुमशक्याः कुत एव वाहाय च विक्रयाय च ॥ इदं तर्हि प्रयोजनं पशुष्विति वक्ष्यामीति । इह माभूत् । ब्राह्मणा इमे वृषला इमे । कः पुनरर्हत्यपशूनां पुंस उत्कालयितुं ये अशक्या वाहाय च विक्रयाय च ॥ इदं तर्हि प्रयोजनं सङ्घेष्विति वक्ष्यामीति । इह माभूत् । एतौ गावौ चरतः । कः पुनरर्हति निर्ज्ञातेऽर्थेऽन्यथा प्रयोक्तुम् ॥ इदं तर्हि प्रयोजनमतरुणेष्विति वक्ष्यामीति । इह माभूत् । उरणका इमे वर्करा इम इति । कः पुनरर्हति तरुणानां पुंस उत्कालयितुं ये अशक्या वाहाय च विक्रयाय च ॥ अनेकशफेष्विति वक्तव्यम् । इह माभूत् । अश्वाश्चरन्ति । गर्दभाश्चरन्तीति ॥

२ अ १ । पा २ । सू ६७ ॥

[1]वृषभस्यापीति । (कै)

सर्वेषामुत्कालनासम्भवादिति भावः ॥


[2]मिश्रत्वादिति । (कै)

तेषामुभयसाधारणजातिविशिष्ट एव शक्तिरिति भावः ॥

इति काळोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टकृते महाभाष्यप्रदीपोद्योते प्रथमाध्यायस्य द्वितीये पादे तृतीयमाह्निकम्

पादश्चायं समाप्तः ॥

इति शिवम्



१ यद्यपि तत्र वृषभस्यास्ति सम्भवः। तथापि मल्लग्रामवद् भूयस्त्वात् स्त्रीभिर्व्यपदेशो भवति ॥

२ अग्राम्यादिषु तु मिश्रत्वात् सङ्घस्येति “पुमान् स्त्रिया” इति पुंसः शेषः ॥

महाभाष्यप्रदीपोद्द्योतः।

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः॥

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्यनिबन्धने॥

भूवादयो धातवः। १। ३। १॥

कस्मान्निमित्तादिति। (कै)

फलमपि निमित्तम्। अत एव "मङ्गलार्थ" इत्युत्तरं सङ्गच्छते। तन्त्रेण कारण प्रश्नश्च॥ अत एव

कुतोऽयं वकारः। यदि तावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यम्। अथासंहितया भूआदय इति भवितव्यम्॥ अत उत्तरं पठति।

*भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते।

कुतोऽयमिति। भा। लक्षणाभावं मत्वा कस्मान्निमित्ताद्वकार इति पृच्छति। यदि तावदिति। भा। यणादेशेनेको निवर्त्तितत्वात्॥ अथासं-

---

क्रियावाचिनो गणपठिता धातुसंज्ञाः स्युः। धातुत्वाल्लडादयः। भवति एधते। क्रियावाचिनः किम्। "याः पश्य" इत्यादौ धातुत्वं माभूत्। सति

---

* विस्तरं तु तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मङ्गलवादरहस्ये द्रष्टव्यम्॥

[१]वृषभस्यापीति। (कै)


सर्वेषामुत्कालनासम्भवादिति भावः॥

[२]मिश्रत्वादिति। (कै)

तेषामुभयसाधारणजातिविशिष्ट एव शक्तिरिति भावः॥

इति कालोपनामकशिवभट्टसुतसतीगर्भजनागोजि-
भट्टकृते महाभाष्यप्रदीपोद्योते प्रथमाध्यायस्य
द्वितीये पादे तृतीयमाह्निकम्
पादश्चायं समाप्तः॥

इति शिवम्



---

१ यद्यपि तत्र वृषभस्याप्ति सम्भवः। तथापि मल्लग्रामवद् भूयस्त्वात् स्त्रीभिर्व्यपदेशो भवति॥

२ अग्राम्यादिषु तु मिश्रत्वात् सङ्घस्येति "पुमान् स्त्रिया" इति पुंसः शेषः॥

महाभाष्यप्रदीपोद्द्योतः ।

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ॥

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्यनिबन्धने ॥

भूवादयो धातवः । १ । ३ । १ ॥

कस्मान्निमित्तादिति । (कै)

फलमपि निमित्तम् । अत एव "मङ्गलार्थ" इत्युत्तरं सङ्गच्छते। तन्त्रेण कारण प्रश्नश्च ॥ अत एव

कुतोऽयं वकारः । यदि तावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यम् । अथासंहितया भूआदय इति भवितव्यम् ॥ अत उत्तरं पठति।

*भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।

कुतोऽयमिति । भा । लक्षणाभावं मत्वा कस्मान्निमित्ताद्वकार इति पृच्छति । यदि तावदिति । भा । यणादेशेनेको निवर्त्तितत्वात् ॥ अथासं-

---

क्रियावाचिनो गणपठिता धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः । भवति एधते । क्रियावाचिनः किम् । "याः पश्य" इत्यादौ धातुत्वं माभूत् । सति

---

* विस्तरं तु तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मङ्गलवादरहस्ये द्रष्टव्यम् ॥

यदि तावदिति (भा)

भाष्योक्तो विकल्पः सङ्गच्छेते ॥ न च भ्वादय इत्युक्तेऽपि वकारस्य सत्वात् प्रश्नानुपपत्तिरत आह

यथेति। (कै)

उकारोत्तरवकारविषयः प्रश्न इति भावः ॥ अस्मात् भाष्यात् समासेऽपि संहिता विकल्प इति भ्रमं वारयति

अभ्युपगम्येति ॥ (कै)

नत्वेकस्मिन्निति। (कै)

यद्यप्यत्र संहिता निमित्तेनैकपदत्वं प्रयोजकं

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारसागमं प्रयुङ्क्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युरिति ॥ अथादिग्रहणं किमर्थम्। यदि तावत् पठ्यन्ते नार्थ आदिग्रह-

---

हितयेति। भा। अभ्युपगम्य वादोऽयम्। नत्वेकस्मिन् पदेऽसंहितास्ति। संहितैकपदेति वचनात्। तस्मात् सर्वथा निर्देशोऽयं न सम्भवतीत्येवं परमेतत् ॥ भूवादीनामिति। भा। सूत्रोच्चारिते भूवादिशब्दे इत्यर्थो विवक्षितः। तत्र वाचकसम्बन्धी भूवादीनां भूवादिशब्दवाच्यानां वकार

हि तस्मिन् "आतो धातोः" (६। ४। १४०) इत्यालोपः स्यात्। न च या प्रापण इत्याद्यर्थनिर्देशो नियामकः। तस्यापाणिनीयत्वात्। भीमसेनादयो ह्यर्थं निर्दिदिशुरिति स्मर्यते। पाणिनिस्तु भ्वेध इत्याद्यपाठीत् इति

इति श्लोके समासग्रहणेनैकपदशब्देनाखण्डपदस्यैव ग्रहणात् ॥ अत एव [1]"अग्रे अग्रे" इत्यादौ आष्टमिकद्वित्वे सा न नित्या किन्तु समासत्वं प्रयोजकं तथापि अनेनैकशेषोक्तश्लोकग्रहणान्न दोषः ॥ नचैवं भाष्यप्रामाण्योच्छेदेति आह

तस्मादिति । (कै)

तथाच तात्पर्य्यविषयाबाधान्नप्रामाण्यमिति भावः ॥ ननु

भूवादीनाम् (भा)

इत्यस्य स्वरूपपरत्वे बहुवचनानुपपत्तिः । अर्थपरत्वे प्रकृतासङ्गतिरतः पर्य्यवसितमर्थमाह

१ प्रकारे गुणवचनस्य (८ । १ । १२) इति सूत्रस्य "आनुपूर्व्ये" इति वार्त्तिकव्याख्यानावसरे दृष्टान्तयोक्तं भगवता तद्यथा— "आनुपूर्व्ये । वा । आनुपूर्व्ये द्वे भवत इति वक्तव्यम् । मूले मूले स्थूलाः । अग्रेअग्रे सूक्ष्माः" ॥

णेन । अन्यत्रापि ह्ययं पठन्नादिग्रहणं न करोति । क्वान्यत्र । "मृड मृद गुध कुषक्लिशवदवसः क्त्वा" (१ । २ । ७) इति । अथ न पश्यन्ते नतरामर्थ आदिग्रहणेन । न ह्यपठिताः शक्या आदिग्रहणेन विशेषयितुम् । एवं तर्हि सिद्धे सति यदादिग्रहणं करोति तज्ज्ञापयत्याचार्य्योऽस्ति च पाठो

इति व्यपदिश्यते ॥ मङ्गलार्थ इति । भा ॥ ननु निमित्ते पृष्टे प्रयोजनकथनमप्रस्तुतम् । नैष दोषः । प्रयोजनकथनेन निमित्तस्यापि कथनात् । अत एव निपातनादागमरूपोऽत्र वकारः कृतः । न चायमसाधुः । वैयाकरण-

भाष्यवार्त्तिकयोः स्पष्टम् । किञ्च । अभियुक्तैरपि क्वतोऽर्थनिर्देशो नार्थान्तरनिवृत्तिपरः सुखमनुभवतीत्यादावधातुत्वप्रसङ्गात् । उक्तं च ।

सूत्रोच्चारित इति ॥ (कै)

तल्लाभप्रकारमाह

तत्रेति। (कै)

वाचकभूवादिशब्दसम्बन्धी वकारस्तद्वाच्यनिष्ठत्वेनोपचर्यत इति भावः ॥

प्रयोजनेति। (कै)

अनिमित्तकस्यासत्प्रायतया प्रयोजनकथनानुपपत्तिरिति भावः ॥ उभयस्मिन् पृष्टे प्रयोजनमात्रकथनमसङ्गतमित्यपि बोध्यम् ॥

न चायमिति। (कै)

सर्वलोकप्रयुक्तत्वाभावादिति भावः ॥

वाह्यश्च सूत्रादिति। किमेतस्य ज्ञापने प्रयोजनम्। पाठेन धातुसंज्ञेत्येतदुपपन्नं भवति॥ पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः। वा। पाठेन धातुसंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। या इति धातुर्या इत्याबन्तः। वा इति धातुर्वा इति निपातः। नु इति धातुर्नु इति प्रत्ययश्च निपातश्च।

निकाये प्रसिद्धत्वात्। तस्य च मङ्गलं प्रयोजनमित्यनेन प्रतिपादितं भवति। अपूर्वस्य हि लाभो दध्यादेर्लोके मङ्गलं सूचयति। तथेहाप्यागमो वकारो मङ्गलार्थः संपद्यते। अथवा सति वकारेऽविकृते भूशब्दे उच्चार्यमाणे महाव्याहृतिस्मरणं मङ्गलं भवतीति पारम्पर्येण वकारो मङ्गलार्थकः

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः
प्रयोगतोऽनुसर्त्तव्या अनेकार्था हि धातवः। इति ॥

अत एव कुर्द खुर्द गुर्द गुद क्रीडायामेव इत्येवकारः। पठ्यते। श्लिष आलिङ्गने इत्यादि सूत्राण्यपीह ज्ञापकानि। तस्माद् "याः पश्य" इत्यादि

वैयाकरणेति। (कै)

अनादिव्यवहार एव साधुत्वप्रयोजको न सर्वलोकप्रसिद्धिः। अन्यथा याज्ञिकमात्रप्रसिद्धस्फादीनां व्याकरणप्रसिद्धटिघुभादीनामप्यसाधुत्वापत्तिरिति भावः॥ ननु मङ्गलं नाम धर्मः। तत्र न वकारोच्चारणं तज्जनकं मानाभावात् भ्वादिशब्देनाऽपि तत्सम्भवाच्चात आह

अपूर्वस्य हीति। (कै)

मङ्गलजनक इति नार्थः। किन्तु सूचक इति न दोषः। निबन्धनं तु शिष्याणामप्यानुषङ्गिकमङ्गलसूचनार्थमिति भावः॥ नन्वस्य मङ्गलसूचकापूर्ववस्तुत्वं न लोकसिद्धमत आह

दिविति धातुर्दिविति प्रातिपदिकम्॥ किञ्च स्याद्यद्येतेषामपि धातुसंज्ञा स्यात्। धातोः (३।१।९१) इति तव्यदादीनामुत्पत्तिः प्रसज्येत (३।१।९६)। नैष दोषः। साधने तव्यदादयो विधीयन्ते साधनं च क्रियायाः। क्रियाभावात् साधनाभावः। साधनाभावात् सत्यामपि धातुसंज्ञायां तव्यदादयो न भविष्यन्ति॥ इह तर्हि याः पश्य आतो धातोः (६।४।१४०)

सम्पद्यते॥ नार्थ इति। भा। भूवादय इति पठित्वा ते धातव इति वक्तव्यम्। यथा "ते तद्राजाः" (४।१।१७४) इति॥ नतरामिति। भा। सति पाठे गतार्थत्वान्न कर्त्तव्यमसति त्वसम्बन्धादित्यर्थः। अत एव प्रतिषेधप्रकर्षः। सम्बन्धाभावेऽत्यन्तमेवाकरणमित्यस्यार्थस्य प्रतिपत्तये निर्दिष्टः॥ एवं तर्हीति। भा। सूत्रेषु ये पठ्यन्ते म्रड म्रदादयः तान्

व्यावृत्तये क्रियावाचिन इति विशेषणं स्थितम्। गणपठिता इति किम्। हिरुक् पृथक् ऋते इत्याद्यव्ययानां शिष्ये इति भावार्थतिङन्तस्य च मा भूत्। न चैवं सौत्रेष्वव्याप्तिः। स्तम्भादीनामुदित्करणेन धात्वधिकारीय-

अथवेति ॥ (कै)

रेफान्तस्यैव महाव्याहृतित्वादाह

स्मरणमिति । (कै)

एवं च वकारलक्षणप्रश्ने इदमेव निपातनविधया लक्षणं गुरूच्चारणन्तु महाव्याहृतिस्मरणलक्षणमङ्गलार्थमित्युत्तरमिति बोध्यम् ॥ तदेतत्सर्वं भाष्ये

वकारमागमम् (भा)

इत्यनेन सूचितं वकारस्यामृतबीजत्वाद्दध्यादिवन्मङ्गलसूचकत्वमित्यन्ये ॥ ननु गणपाठेऽपि आदिग्रहणं विना कथं सर्वसङ्ग्रहोऽत आह

भूवादीति । (भा)

इति लोपः प्रसज्येत । नैष दोषः । अनाप इत्येवं सः (६ । ४ । १४०) ॥ अस्य तर्हि वा शब्दस्य निपातस्याधातुरिति (१ । २ । ४५) प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत । अप्रातिपदिकत्वात् स्वाद्युत्पत्तिर्न स्यात् । नैष दोषः । निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं (१ । २ । ४५) तत्रा-

---

समाप्य ते धातव इति वचनेन सिद्धे सतीत्यर्थः ॥ अस्ति च पाठ इति । भा । अनेनासम्बन्धत्वं परिहृतम् ॥ "वाह्यश्च" इत्यनेन गतार्थत्वं निराकृतम् ॥ पाठेनेति । भा । धातुपाठे ये पठितास्तेषामेव धातुसंज्ञा । तेषां च पाठो नोपलक्षणार्थः अपि तु इयत्ता प्रतिपादनार्थः तत्र यदि क्रियावाची

कार्य्यविधानेन च धातुत्वानुमानात् । न चैवमपि लौकिकानां चुलुम्पादीनामसङ्ग्रहापत्तिः । भ्वाद्यन्ते यजादि समाप्त्यर्थं वृत्करणेऽपि भ्वादीनामसमाप्तेः । धातुवृत्तिषु तथैव व्याख्यातत्वात् । "कास्यनेकाजग्रहणं चुलुम्पा-

एवं च भूपदस्थाने ते पदस्यावश्यकतया आदिपदमात्रविषयः प्रश्नो भाष्ये कृत इति भावः॥

इन्धिभवतिभ्यां च (पा)

इति भवतिमादिं मन्यते॥

असन्तमेवेति

अनेन सति पाठे संनिधानाविशेषाद्धातूनामिव प्रत्ययानामपि तत्पदं परामर्शकं स्यादितिज्ञापकक्लेशवारणाय स्पष्टप्रतिपत्तये आदिग्रहणं कदाचित् क्रियेतेतिनात्यन्तमकरणमितिसूचितम्॥ ननु "एवं तर्हि सिद्धे" इति भाष्यमनुपपन्नं सूत्रपठितकतिपयानां धातुत्वसिद्धावपि सर्वेषां तत्सिद्ध्यभावादत आह

नर्थकग्रहणं न करिष्यते। निपातः प्रातिपदिकमित्येव॥ इह तर्हि चक्रू इति "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६।४।७७) इत्युवङादेशः प्रसज्येत। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययस्योवङादेशो भवतीति यदयं तत्र श्नु ग्रहणं करोति॥ अस्य तर्हि दिव् शब्दस्याधातुरिति प्राति-

---

धातुरित्येतल्लक्षणं क्रियेत तर्हि आणवयति वट्टयतीत्यादीनामपि धातुसंज्ञा स्यात्। अथ सूत्रपठितानामनन्तरं ते धातव इत्युच्येत तदा तत्रापठितानां न स्यात्। तस्मात् "भूवादय" इत्युक्तम्। तत्र सूत्रवार्त्तिकभाष्यगणेषु ये पठ्यन्ते तेऽपि सूत्रकारादिप्रामाण्याद्धातुत्वेनाश्रयणीयाः॥ समानशब्दाना-

---

द्यर्थम्" इति कात्यायनवचनेनाप्येतल्लभ्यते। एवं आद्यन्ते वृत्करणस्य पुषादिसमाप्त्यर्थतया दिवादीनामपरिसमाप्तेर्वट्टयतीत्यादि सिद्धिः। वस्तुतस्तु चुरादीनामन्ते "बहुलमेतन्निदर्शनम्" इति गणसूत्रेण सकलेष्टसिद्धिः। तद्धि धातुवृत्तिषु द्वेधा व्याख्यातम्। आदिगणपठितेभ्योऽपि णिच् प्रयोगा-

सूत्रेष्विति। (कै)

पूर्वपक्षी बहिर्गणपाठं न जानात्येवेति "इग्धि भवतिभ्यां च" (१।२।६) इति सूत्रस्थं भवतिमादिं मन्यते इति तं प्रत्याह सिद्धान्ती "यदि तावतामेव धातुत्वमिष्टं स्यात्तर्हि ते धातव इत्येव वदेत्" इत्यादिग्रहणं ज्ञापकमिति भावः। न च प्रकारवाच्या-द्यादिशब्दो दृष्ट इति कथं ज्ञापकत्वं व्यवस्थावाच्यादिशब्दस्य प्रसि-द्धतरत्वादिति भावः॥ ननु बाह्यः पाठ इत्येतावतैव सत्ताया अपि सिद्धेरस्ति पाठ इति व्यर्थमत आह

अनेनेति॥ (कै)

यथा चादिग्रहणाकरणे पाठेन संज्ञा इत्येतदुपपत्तिस्तथा दर्शयति

पदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात् स्वाद्युत्पत्तिर्न स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्ते दिव् शब्दात् स्वादय इति यदयं दिवः सावौत्वं शास्ति (७ । १ । ८४)। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य ज्ञापने प्रयोजनम्। किम्। दिव् शब्दो यत्प्रातिपदिकं

मिति। भा। समानश्रुतीनामिष्टविपरीतानामक्रियावाचिनामित्यर्थः॥ तव्यदादीनामिति। भा। यथैव दिवं पश्येति बाह्यक्रियापेक्षे कर्मणि द्वितीया भवति एवं तव्यदादयोऽपि स्युरित्यर्थः॥ साधन इति। भा। अन्तरङ्गधातुवाच्यक्रियापेक्षे साधने तव्यदादयः सावकाशाः बाह्यक्रियापेक्षे

नुसाराज्ज्ञप इति। दशगणीपाठो दिङ्मात्रप्रदर्शनार्थस्तेनान्येऽपि शिष्ट-प्रयुक्ता धातवः संग्राह्या इति च। स्यादेतत्। भूरादिर्येषां इति विग्रहे यणि सति भ्वादय इति स्यात्। क्रियावाचित्वं च सूत्रानारूढमेवेति।

ये धातुपाठ इति। (कै)

यद्यपि ते इति पाठेऽपि पाठमूलैव संज्ञा तथापि पाठविशेषमूलत्वज्ञापनं ज्ञापकफलमिति भावः॥ ननु स्तुतिप्रभृतीनां सौत्राणां धातुत्वाय भ्वादेराकृतिगणत्वमावश्यकमित्याशयत्यादावतिप्रसङ्गोऽत आह

तेषां चेति। (कै)

अत एव भ्वादिसमाप्तौ वृत्करणम्॥ "बहुलमेतन्निदर्शनम्" (चुरादिगणसूत्रम्) इत्यपि यदि प्रामाणिकं तर्हि णिच एव तत् न गणपाठस्येति भावः। ध्वनितं चेदं "पाठेन धातुसंज्ञा" इत्येतद् भाष्येण॥ ननु "याः पश्यति" इत्यादि व्यावृत्त्यर्थं क्रियावचनत्वस्यावश्यवाच्यतया पाठफलं नास्तीत्यतस्तत्फलं दर्शयति

तदर्थमेतत् स्यात्। अस्त्यूरिति। न वा अन्वेष्यते। अनिष्टं च प्राप्नोति। इष्टं च न सिध्यति। एवं तर्ह्यननुबन्धकग्रहणे न सानुबन्धकस्य इत्येवमेतस्य न भविष्यति। एवमप्यननुबन्धको दिव् शब्दो नास्तीति कृत्वा सानुबन्धकस्य ग्रहणं विज्ञास्यते॥ परिमाणग्रहणञ्च। वा। परिमाणग्रहणञ्च कर्त्तव्यम्।

साधने नोत्पद्यन्ते इत्यर्थः। योऽपि शकधृष (३। ३। ६५) इति स्वार्थिकस्तुमुन् सोऽप्यनभिधानान्न भविष्यति॥ याः पश्येति। भा। यच्छब्दो न धातुरिति विभक्तिरुत्पद्यते तस्यामत्वे टापि च कृते धातुसंज्ञायाम् "आतो धातोरिति" लोपप्रसङ्गः चखू इति। भा। ननु गुर्धातुषु पठितः।

उच्यते। भवनं भूः क्रिया सामान्यम्। वदन्तीति वादयः। वदेरौणादिक इञ् इति भाष्यम्। यद्यपि "वसि वपि यजि राजि व्रजि सद्दि हनि वासि वादि वारिभ्य इञ्" (उणा—सू—५६३। चतुर्थ—पा) ("सद्दि" इत्यत्र—"सदि" इत्यपि पाठः) इत्यौणादिकसूत्रेण वदेर्ण्यन्तात् इञ् विहित-

तत्रेति॥ (कै)

आज्ञापयतीत्यर्थे

आणवयतीति। (कै)

प्राकृतं अपभ्रंशानामपि स्वातन्त्र्येणैव बोधकत्वाङ्गीकारादेतेषां क्रियावाचित्वं बोध्यम्॥ अथ पाठविशेषफलं दर्शयति

अथ सूत्रेति॥ (कै)

ननु पाठस्योपलक्षणत्वे ऋत्यादीनां कथं धातुत्वमत आह

सूत्रेति॥ (कै)

ऋतेरियङ् (पा)

इति सूत्रमनेकाज्ग्रहणं "चुलुम्पाद्यर्थम्" इति वार्त्तिकं गणः"क-ण्ड्वादिः" धात्वधिकारविहितकार्योद्देश्यताकरणरूपं तत्प्रामाण्यम्। तेन च पूर्वं धातुपाठे पठितानामिदानीं पाठभ्रंशोऽनुमीयते इति

इयानवधिर्धातुसंज्ञो भवतीति वक्तव्यम्। कुतो ह्येतद्भूशब्दो धातुसंज्ञो भविष्यति न पुनर्स्वेधशब्द इति॥ यदि पुनः क्रियावचनो धातुरित्येतल्लक्षणं क्रियेत। का पुनः क्रिया। ईहा। का पुनरीहा। चेष्टा। का पुनश्चेष्टा।

न चास्य तेन सारूप्यम्। नैष दोषः प्रयोगे नुशब्द एव धातुस्तेन चास्य सारूप्यमस्त्येव। यद्यपि चायं सानुबन्धकस्तथापि धातुष्वनुबन्धकपरिभाषा कैश्चिन्नाश्रीयते। अथवोपलक्षणार्थमिदं तेन स्थाणू वेणू इत्युदाहरणम्। अक्षद्यूरिति। भा। अत्र कृदन्तत्वात् प्रातिपदिकत्वम्। न वै अत्रेष्यत

स्तथापि बहुलग्रहणात् केवलादपि भविष्यतीति न्यासकारादयः। वस्तु-तस्तु वदन्तीति वादय इति भाष्यमर्थकथनपरम्। णयन्तादेवत्विञ्। न चेह ण्यर्थानन्वयः। पचति पाचयत्योस्तुल्यार्थत्वात्। भुवो वादय इति विग्रहः।

भावः ॥ न चैवमप्यवश्यं पठनीये गणे सूत्रान्तरे च गणं पठित्वा "ते धातव" इत्येव किं नोक्तमिति चेन्न । एवं विधसूत्रकरणे "अल्पाक्षरमसन्दिग्धम्" इति सूत्रलक्षणोच्छेदापत्तिः । अन्यथा सर्वादीनपि सूत्रान्तः पठित्वा सर्वनामानीत्याद्युक्त्यैव सिद्धे बहुव्याकुलतापत्तिरित्याहुः ॥ ननु समानशब्दानामित्यत्रार्थतः साम्ये पर्य्यायाणामित्यर्थेऽसंगतिः । पर्य्यायातिप्रसंगस्य पाठाश्रयणप्रयुक्तत्वाभावादत आह

समानश्रुतीनामिति ॥ (कै)

ननु प्रयोगस्थानां गणपठितेभ्यो भिन्नत्वेन समानश्रुतित्वेनैव कार्य्यस्य वक्तव्यत्वादाह

इष्टेति ॥ (कै)

इष्टानिष्टविभागस्य दुर्ज्ञेयत्वादाह

व्यापारः ॥ सर्वथा भवान् शब्देनैव शब्दानाचष्टे न किं चिदर्थजातं निदर्शयत्येवं जातीयिका क्रियेति । क्रिया नामेयमत्यन्तापरिदृष्टा । अशक्या क्रिया पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठितः । सासावनुमानगम्या ।

इति । भा । शिष्टप्रयोगाभावात् । तस्माद् "दिव औत्" (७ । १ । ८४) इति ज्ञापकमेव । इतरो ज्ञापकत्वं विघटयति । अनिष्टं चेति । भा ॥ एवं तर्हीति । भा । धातुः सानुबन्धक इति भावः ॥ एवमपीति । भा । अधातुरिति प्रातिपदिकसंज्ञानिषेधान्निरनुबन्धकात् सोरसम्भव उभयसम्भवे चास्याः

तथा च क्रियावाचित्वं तावत्सूत्रारूढम् । निरनुबन्धानां शब्विकरणानां भूप्रभृतीनां पाठसामर्थ्यात्पठितानामेव संज्ञेत्यनुमीयते । "सनाद्यन्ता धातवः" (३ । १ । ३२) इति सूत्रारम्भाच्च । अथवा भूरादिर्येषाम् इति विग्रहः ।

अक्रियेति ॥ (कै)

नन्वेषामक्रियावाचित्वात् कारके विधीयमानतव्यादीनां कथं प्राप्तिरत आह

यथैवेति ॥ (कै)

अन्तरङ्गेति । (कै)

प्रतिपदिकाद्द्वितीयेत्यादौ प्रातिपतिकार्थनिरूपितकर्मासम्भवात् तथा ग्रहणेऽपि धातोस्तव्यदित्यादिवाक्ये उपस्थितधात्वर्थापेक्षकारकसम्भवान्न वाह्यग्रहणमिति भावः । अनया रीत्या भावेऽप्यनुपपत्तिर्बोध्या । साध्यावस्थस्यैव तव्यदादिविधौ भावपदार्थत्वात् ॥ भाष्ये

साधन इति (भा)

भावोपलक्षणं बोध्यम् ॥

कोऽसावनुमानः । इह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचतीत्येतद्भवति कदाचिन्न भवति । यस्मिन् साधने सन्निहिते पचतीत्येतद्भवति सा नूनं क्रिया । अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया । कथं पुनर्ज्ञायते क्रियावचनाः पचादय इति । यदेषां करोतिना

परिभाषायाः उपस्थानं नान्यथा । इयानवधिरिति । भा । अवधिमानवधिनोपलक्ष्यते । तेन विशिष्टावधिपरिच्छिन्नस्य धातुसंज्ञा विधेयेत्यर्थः ॥ स्वेधशब्द इति । भा । ततश्च स्वेधशब्दाल्लडादिप्रसङ्गः । न चार्थपाठः परिच्छेदकः । तस्यापाणिनीयत्वात् । अभियुक्तैरुपलक्षणतयोपात्तत्वादने-

---

निपातनाद्वुगागमः । महासंज्ञाकरणं तु दधति क्रियामिति धातव इत्यन्वर्थसंज्ञाविज्ञानार्थम् । यद्वा । भूश्च वाश्च इति द्वन्द्वः । आदिशब्दयोस्तु व्यवस्थाप्रकारवाचिनोरेकशेषः । ततो भूवौ आदी येषाम् इति बहुव्रीहिः । भूप्रभृतयो वा सदृशाः क्रियावाचिन इति यावत् अथवा वा इत्ययमादि-

भावे इति।

यद्यपि न यदृच्छादिभावाच्चर्यात् साध्यत्वेनापि भासमाने भावे एतद्विधानादित्याहुः॥ नन्वेवमपि स्वार्थिकास्तुमुनादयः स्युरत आह

योऽपीति। (कै)

तादर्थ्ये तुमुनः क्रियार्थक्रियोपपदत्वाभावादप्रसक्तेराह

शक्तिति॥ (कै)

वस्तुतो"ऽव्ययकृतो भाव" इत्युक्तेः। सोऽपि भाव एवेति बोध्यम्॥ ननु धातुत्वे विभक्त्यनुपपत्तिरेव कुतो न शङ्कितेत्यत आह

यच्छब्द इति॥ (कै)

अनाप इत्येवमिति (भा)

सामानाधिकरण्यम्। किं करोति पचति। किं करिष्यति पक्ष्यति। किमकार्षीत् अपाक्षीदिति॥ तत्र। क्रियावचन उपसर्गप्रत्ययप्रतिषेधः। वा। क्रियावचने धातावुपसर्गप्रत्यययोः प्रतिषेधो वक्तव्यः। पचति प्रपचति॥ किं पुनः कारणं प्राप्नोति। सङ्घातेनार्थगतेः। वा। सङ्घातेन ह्यर्थो गम्यते

कार्थत्वदर्शनादर्थस्य नियामकत्वाभावात्॥ क्रियावचन इति। भा। एवं सति समानशब्दानां प्रतिषेधो न वक्तव्यः नापि परिमाणग्रहणम्। न हि भेधशब्दसमुदायः क्रियावाची। का पुनरिति। भा। द्रव्यव्यतिरेकेण तस्याः सत्तामसंभावयतः प्रश्नः। ईहेति। भा। ईहाचेष्टाशब्दयोरन्यत्रव्यापारविशेषवचनत्वेऽपि इह व्यापारमात्रवचनत्वं बोद्धव्यम्। कस्यचित्

येषाम् इति बहुव्रीहिः वा इत्यस्यादय इति तत्पुरुषः। तयोरेकशेषे स्वरभिन्नानामिति बहुव्रीहिशेषः। भूवो वादय इति षष्ठीतत्पुरुषः। वाच्यवाचकभावस्य षष्ठ्यर्थः। "द्विर्वचनेऽचि" (१।१।५९) इति वक्तव्यादित्यादिना वा

भाष्ये। अत एव क्तः अः इत्यादिसिद्धिरिति भावः॥ न च लक्षणप्रतिपदोक्तपरिभाषया टाबन्तस्य न धातुसंज्ञेति वाच्यम्। "सकारजः षकारश्चेर्षाट्टवर्गस्तवर्गजः" इत्यभियुक्तोक्तेर्भूवादिसूत्रे तत्परिभाषाप्रवृत्तेर्वक्तुमशक्यत्वादित्याहुः॥ भाष्ये

तच्चानर्थकग्रहणं न करिष्यते इति। (भा)

एवं चानर्थकेष्वप्राप्तविध्यर्थं तत्॥

चादिषु अधातुरिति। (कै)

बाधकबाधनार्थमपीति भावः॥

नन्विति। (कै)

पठित साहृप्यस्यैव संज्ञाप्रयोजकत्वादिति भावः॥

सप्रकृतिकेन सप्रत्ययकेन सोपसर्गेण च॥ अस्ति भवति विद्यतीनां धातुत्वम्। वा। अस्ति भवति विद्यतीनां धातुसंज्ञा वक्तव्या। यथा हि भवता करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथास्त्यादीनां निदर्श्यते। न हि भवति किं करोति अस्तीति॥ प्रत्ययार्थस्याव्यतिरेकात्

केनचिच्छब्देनसोऽर्थः प्रसिद्धः इत्यनेकपर्य्यायोपादानम्। सर्वथेति। भा। यावद् द्रव्यव्यतिरेकेण क्रियासद्भावे प्रमाणं नोक्तं तावत् पर्य्यायोपादान-मात्रेण तस्याः स्वरूपं न निश्चीयते इत्यर्थः। अर्थजातमिति। भा। अथ स्वरूपमित्यर्थः॥ अशक्येति। भा। आख्यातपदवाच्या पूर्वापरीभूतावयवा

उभयलाभः। सर्वथापि क्रियावाचिनोभ्वादय एव धातव इति स्थितम्। का पुनः क्रिया। उच्यते। करोत्यर्थभूता उत्पादनापरपर्य्याया उत्पत्त्यनुकूल-व्यापाररूपा भावनैव क्रिया। तथा हि। अभवतो गगणादेरक्रियमाणतया भवतश्च घटादेः क्रियमाणतया भवत्यर्थकर्त्तुः करोति कर्मत्वम्। तथा च।

[1]नैष इति । (कै)

कार्य्यार्थत्वात् संज्ञायाः प्रयोगे (नुशब्दाऽ) ऽध्यारोपेण संज्ञाप्रवृत्तिर्न तु णावस्थायां न शब्दसंज्ञार्थमेव णु पाठ इति प्रयोगस्थे पठितबुद्ध्यारोपेण संज्ञा प्रवृत्त्या तत्स्वरूपेति प्रसङ्गापादानं युक्तं "णो नः" (६ । १ । ६५) इत्यादौ तु धात्वादेरित्यस्य भाविसंज्ञा परत्वान्न दोषः इति भावः ॥ अयं क्तु प्रत्ययः "कैश्चिद्" इति भूवादय इत्यत्र "नाश्रीयते" इत्यर्थः ॥

अथवेति । (कै)

अयमभ्युच्चयः प्रागुक्तरीत्या सामञ्जस्यात् । किं चैवं अनुग्रहणेऽस्य ज्ञापकत्वपरभाष्यासंगतिः । चत्रू इत्यादावुवङापत्तिस्त्ववर्णान्तत्व-[2]धात्वन्ताङ्गस्य इत्यर्थमभिप्रेत्य बोध्या ॥ भाष्ये

१ कार्य्यार्थत्वात् संज्ञायाः प्रयोगे नु शब्दावस्थायामेव संज्ञाप्रवृत्तिर्न तु णावस्थायां नु शब्दसंज्ञार्थमेव — — इति क पुस्तके ॥

२ त्त्ववर्णान्तधात्वन्ताङ्गस्य । क ॥

प्रकृत्यन्तरेषु। प्रत्ययार्थस्याव्यतिरेकात् प्रकृत्यन्तरेषु मन्यामहे धातुरेव क्रियामाहेति । पचति पठति । प्रकृत्यर्थोऽन्यश्चान्यश्च प्रत्ययार्थः स एव ॥

साध्यमानावस्थाभूतभविष्यद्वर्त्तमानसदसदनेकावयवसमूहरूपा सदस्तुविषयेन्द्रियग्राह्या न भवतीत्यर्थः । पिण्डीभूतेति । भा । यथा परमाणवः पिण्डीभूता उपलभ्यन्ते न केवला एवं पिण्डीभावाभावात् क्रिया न प्रत्यक्षेत्यर्थः ॥

करोत्यर्थकर्तुर्भवित्रप्रयोजकतया भवतेरुत्पत्त्यर्थाप्रयोजकव्यापारे णिजुत्पद्यमानः करोत्यर्थमवलम्बते । उक्तं च,—

अस्य तर्हि दिव् शब्दस्येति । (भा)

अव्युत्पन्नप्रातिपदिकस्येत्यर्थः ॥ ननु अत्रापि धातुत्वात् कथं प्रातिपदिकत्वमत आह

अत्रेति । (कै)

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणादिति भावः ॥

नवै अत्रेति (भा)

भाष्यं पुनरुक्तमतो वाक्यभेदेन योजयति

शिष्टेति । (कै)

अत्र शिष्टाप्रयोगादेवौत्त्वाप्रवृत्तौ स्वर्गार्थकदिव्शब्दार्थमेवेदं स चेद्धातुत्वादप्रातिपदिकं व्यर्थमेव तदिति ज्ञापकत्वमिति भावः ॥

इतर इति । (कै)

अप्रयोगस्य लक्षणैकचक्षुष्कैर्दुर्ज्ञेयतया चारितार्थ्यसम्भावना सत्वादिति भावः। यद्यपीष्टं न सिध्यति तथाप्यनिष्टप्राप्त्यर्थमेव शास्त्रं स्यात्। तथा च विपरीत एवेष्टानिष्टविभागः स्यात् इति भाष्यार्थः॥ ज्ञापकबाधाह

धातोस्स्वार्थाभेदात् प्रत्ययान्तरेषु। धातोस्स्वार्थाभेदात् प्रत्ययान्तरेषु मन्यामहे धातुरेव क्रियामाहेति। पक्त्वा पचनम् पाक इति। प्रत्ययार्थोऽन्यस्या-

---

गर्भो निर्लुठित इति। भा। यथा कुक्षिस्थो गर्भोऽप्रत्यक्षस्तथा क्रियेत्यर्थः। अथवा यथा निलुठितो निर्गतः कुक्षेर्गर्भः। प्रत्यक्षो नैवं क्रियेति

करोति क्रियमानेन न कश्चित्कर्मना विना।
भवत्यर्थस्य कर्त्ता च करोतेः कर्मजायते॥ १॥

एवं तर्हीति॥ (भा)

तत् खण्डनवाह्याह

एवमपीति॥ (भा)

"नास्ति" इत्यस्य सुपर इत्यादि तदाह

अधातुरिति। (कै)

तदेवं समानशब्दातिप्रसङ्गः स्थितः। अत एव

परिमाणग्रहणं चेति (भा)

चकारस्तदर्थं भगवता न व्याख्यातः॥ अवधेः संज्ञायां ऊकारादेरेव सा स्यात् न भू इत्यादेरत आह

अवधिमानिति। (कै)

इदं च इयत्पदेन भाष्ये ध्वनितमिति भावः॥

अभियुक्तैरिति। (कै)

भीमसेनेनेत्यैतिह्यम्। तत्रैव हेतुमाह

अनेकार्थत्वेति। (कै)

न्यश्च भवति प्रकृत्यर्थः स एव॥ कथं पुनर्ज्ञायतेऽयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति। सिद्धं त्वन्वयव्यतिरेकाभ्याम्। वा। अन्वयाच्च व्यतिरेकाच्च। कोऽसा-

---

वैधर्म्येण दृष्टान्तः॥ सासाविति। भा। या पूर्वमुक्ता सासावनुमानेन प्रतीयत इत्यर्थः। कोऽसाविति। भा। यो भावे ल्युट् स नपुंसकः। अन्यत्र त्वभिधेयवशादनियतलिङ्गः। अथवा मन्यतेर्घञनुमान इति रूपम्।

करोत्यर्थस्य यः कर्त्ता भवितुः स प्रयोजकः।
भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते॥ २॥

अर्थनिर्देशस्य व्यभिचारित्वेनाप्रयोजकत्वाद्व्यवस्थापकत्वाभावेन परिमाणग्रहणमपि कार्य्यमिति भावः ॥

क्रियेतेति (भा)

लिङ्बोधितेऽस्य लक्षणस्य सम्भावनीयत्वे हेतुमाह

एवमिति॥ (कै)

न हीति। (कै)

अवयवानां वाचकत्वेऽपि दशदाड़िमादिवत् समुदायोऽनर्थक इति भावः॥ शब्दानुशासनप्रवृत्तानामर्थविवेचने का प्रसक्तिरत आह

द्रव्येति ॥ (कै)

असम्भावयत इति। (कै)

अप्रत्यक्षत्वादिति भावः। प्रकृतलक्षणेनापि द्रव्यवाचिनां धातुत्वानिवृत्तेः समानशब्दातिप्रसङ्गस्तदवस्थ इति भावः ॥

अन्ययेति। (कै)

न्वयो व्यतिरेको वा। इह पचति इत्युक्ते कश्चिच्छब्दः श्रूयते पचशब्दस्य-कारान्तोऽति शब्दस्य प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च। पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। पच्

यस्मिन् सन्निहिते इति। भा। यस्मिन् वस्तुनि सन्निहिते सति पचतीत्येतत् प्रयुज्यते नासति सा क्रिया। क्वचित्तु यस्मिन् साधने सन्निहिते इति पाठः। तत्रायमर्थः। यस्मिन् सन्निहिते सति पचतीत्येतत् साधनविषये

प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः।
णयन्ता एव प्रयुज्यन्ते तत्प्रयोजककर्मसु ॥ ३ ॥

[1]मानसव्यापार इच्छारूप ईहा। इच्छाकाङ्क्षास्पृहेहातृडिति कोशात्कायपरिस्पन्दश्चेष्टा॥

ईहेति। (कै)

"समानमीहमानानाम्" इति भाष्यप्रयोगाद् ईह चेष्टाया-मित्यर्थनिर्देशाच्चेति भावः॥ नन्वेकपर्य्यायेणार्थस्य व्याख्यानसम्भवात् पर्य्यायान्तरोपादानमनर्थकमत आह

कस्य चिदिति॥ (कै)

"सर्वथा" इत्यादिभाष्यमुपहासपरं स किं शब्दैर्व्याकरोषीति वा उत शब्दान् व्याकरोषीति। नाद्यः शब्दैरेव यतो व्याख्यानं नाचिनि कोशा (चा। क) दिभिर्नान्तः प्रयुक्तशब्दस्याप्रसिद्धत्वे व्याख्येयत्वादत आह

यावदिति। (कै)

क्रियापदार्थप्रश्ने इदं युक्तं न तु क्रियापदार्थो नातिरिक्तो

---

१ "मानस" इत्यारभ्य "इहेति" इत्यन्तं नास्ति इ पुस्तके॥

शब्दो हीयते पठ् शब्द उपजायतेऽतिशब्दोऽन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। विक्लित्तिर्हीयते पठिक्रियो-पजायते कर्तृत्वं चैकत्वं चान्वयि। ते मन्यामहे यः शब्दो हीयते

भवतीति। स्यादेतत्। मृगतृष्णिकाविषयजलज्ञानवत् पचतीत्येतदसत्य-विषयमेव ज्ञानमित्याशङ्क्याह। अथवेति। भा। देशान्तरप्राप्तिलक्षणेन कार्य्येणावाधितेन क्रियाख्यां कारणमनुमीयत इत्यर्थः॥ ननु प्रत्यक्षाप्रवृत्तौ

तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामाहुर्भावविनां भावनाविदः॥ ४॥

द्रव्यादिति प्रश्ने तत्र हि द्रव्यव्यतिरेक एव साधनीय इति उपहास इति भावः। स्वरूपं द्रव्यव्यतिरेकः शब्दैरेव शब्दान् व्याकरोतीति भाष्याक्षरार्थः॥ समूहार्थकजातशब्दस्य प्रकृते ऽन्वयादाह

अथेति। (कै)

अत्रेदं तत्त्वम्। कारकं न क्रिया तस्यां कारकानन्वयापत्तेः कारकाणां मिथः सम्बन्धायोग्यत्वात्। तस्मात् द्रव्यातिरिक्तक्रिया सिद्धः। सर्वथेत्युपहासः कारकातिरिक्तक्रिया प्रत्यक्षेणनोपलभ्यते इत्येवं परो वाच्यः सचेष्ट एवेतिगूढाभिसन्धिप्रत्युपहासपरं "क्रियानाम" इत्यादि भाष्यम्॥

[1]अत्यन्तापरदृष्टेति। (भा)

---

१ "अत्यन्तापरिदृष्टेति" पाठ उपलब्धभाष्यपुस्तकेष्वस्ति। परं विवरणे अत्यन्तापरदृष्टेति पाठोऽस्ति॥ परोक्षे लिट् (३। २। ११५) इति सूत्रस्थभाष्येऽपि एवं दृश्यते। तद्यथा। "क्रियानामेयम् अत्यन्तापरिदृष्टानुमानगम्याशक्या पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठितः"॥

तस्यासावर्थो योऽर्थो हीयते यः शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोऽन्वयी। विषम उप-

---

सम्बन्धग्रहणाभावात् कथं क्रियाविषयमनुमानं प्रवर्त्तते। नैष दोषः। धातुवाच्यस्य समूहस्य युगपदसन्निधानादप्रत्यक्षत्वेऽप्येकैकस्य तु क्षणस्य प्रत्यक्षत्वे बुद्धा तान् क्षणान् संकलय्य पचतीति प्रयुज्यते। यदाप्येकस्मिन्

सा च सकलधातूनां वाच्या। अत एव किं करोतीति प्रश्ने पचति पठति इत्याद्युत्तरं सङ्गच्छते। न चासौ मीमांसकोक्तरीत्या प्रत्ययवाच्ये-

परेण प्रमाणेन प्रत्यक्षेणात्यन्तमवयवशः समूहरूपेण चादृष्टेत्यर्थः॥ तत्र निदर्शनस्याशक्यत्वे हेतुमाह

आख्यातेति॥ (कै)

तत्राप्रत्यक्षत्वे हेतुरनेकावयवरूपत्वं तच्च घटादिषु व्यभिचरितमतः

सदसदिति। (कै)

तदुपपादकं भूतेत्यादिसमूहव्यवहारो बुद्धिकृतो विकल्परूप एव न वास्तव इति बोद्धम्॥ नन्वतीतप्रयोगे सर्वेषामतीतत्वात् भविष्यति सर्वेषां भावित्वाच्च कथं सर्वत्र वैरूप्यमत आह

[1]पूर्वापरीभूतेति॥ (कै)

तत्त्वे बीजमाह

साध्यमानेति। (कै)

वर्त्तमानविषयेऽपि तत्त्वमेवमुपपाद्यम्। तथा हि वर्त्तमानत्वं प्रारब्धपरिसमाप्तत्वम्॥ नन्वेकत्र क्षणे तत्त्वं सम्भवति तस्मादारब्धत्व-

---

१ पूर्वापरभूतेति पाठो विवरणे ऽस्ति॥

न्यासः। बहवो हि शब्दा एकार्था भवन्ति। तद्यथा। इन्द्रः शक्रः पुरुहूतः पुरन्दरः। कन्दुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः

क्षणे पचतीति प्रयोगस्तदा तत्र समूहरूपारोपणम्। शब्दशक्तिस्वभावा-च्चैकः क्षणो नैव धातुवाच्यः। किं करोति पचतीति। सामान्यविशेषभावेन

वास्तामिति वाच्यम्। भोक्तव्यमित्यादावाख्यातं विनापि तत्प्रतीतेः। तथाच तत्रापि कारकापेक्षा दृश्यते। अस्ति च तत्रापि करोति सामानाधिक-

मतीतक्षणमादाय। असमाप्तत्वं तु भविष्यत्क्षणमादाय इत्येव समर्थनीयं क्षणा एव च क्रियाधारा इति न च तत्तत्कालसम्बन्ध एव वर्त्तमानत्वमिति वाच्यम् एवं हि परं प्रति "पश्य मृगो धावति" इति शब्दप्रयोगानुपपत्तेः। न हि स्वज्ञानप्रभृतिपर-ज्ञानपर्य्यन्तम् एकः क्षणोऽस्ति समूहरूपत्वे तु अवयवान्तरावच्छेदेन स्वानुभूतां वर्त्तमानताम् अवयवान्तरावच्छेदेन [1]परं बोधयितुं तदुपपत्तेः। बिलाद्बिलं प्रविशति सर्वं किञ्चिदवच्छेदेन सर्वमनु-भवतोऽवयवान्तरावच्छेदेन तं दर्शयितुं सूर्य्यं पश्येति प्रयोगवत्॥

सद्वस्त्विति। (कै)

सद्वस्तूनि विषयाणि येषाम् इन्द्रियाणां तत् ग्राह्या नेत्यर्थः॥ ननु यदि पिण्डीभूता क्रिया कुतो निदर्शयितुं न शक्येत्यत आह

यथेति। (कै)

पिण्डीभूता इति। (कै)

१ 'परम्' इत्यारभ्य 'तम्' इत्यन्तं नास्ति ह पुस्तके॥

पादाः माषा इति। अतः किं न साधीयोऽर्थवत्ता सिद्धा भवति। नापि ब्रूमोऽर्थवत्ता न सिध्यतीति। वर्णितार्थवत्तान्वयव्यतिरेकाभ्यामेव। तत्र कुत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्

सामानाधिकरण्यात् क्रियाविशेषवचनाः पचादयः प्रतीयन्त इत्यर्थः। यदा तु किं करोतीति पृष्टे न करोत्यास्त एव केवलमिति प्रतिवचनं तदा

रण्यम्। किं कर्त्तव्यम्। भोक्तव्यम्। किं कृतवान्। भुक्तवान् इति। किञ्च। भावयति घटमितिवत्त्वन्मते भवति घटमित्यपि स्यात्। तुल्यार्थत्वात्। दृष्टान्ते

कार्य्यात्मना स्थिता इत्यर्थः॥ अनेन दृष्टान्तेन परमाणुवदवयवक्रियाणामप्यप्रत्यक्षत्वं सूचितम्॥

कुक्षिस्थ इति। (कै)

आद्येऽनिर्लुठित इति छेदः। द्वितीये निर्लुठित इति छेदो निष्क्रान्त इति च तदर्थ इति भेदः॥ अत्यन्तापरदृष्टत्वेन अवयवरूपेणाप्यप्रत्यक्षत्वं तदवयवानां क्षणरूपत्वात् "पश्य धावती"ति तदनुमायकफलपरमेव। एतेन क्रियानुमेयैवेत्युक्तं भवति। "वर्त्तमाने लट्" (३। २। १२३) इति सूत्रस्थभाष्यस्वरसोऽप्येवमेव॥

या पूर्वमिति। (कै)

अदः शब्द इदमर्थ इति न पौनरुक्त्यमिति भावः। तच्छब्दाव्यवहितोत्तरवर्त्ती अदस्शब्दः प्रसिद्धार्थक इत्यन्ये॥ ननु ल्युडन्तत्वे नपुंसकत्वं स्यादत आह

प्रत्यय एव वा। सामान्यशब्दा एत एवं स्युः। सामान्य शब्दाश्च नान्तरेण प्रकरणं विशेषणं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खलु नियोगतः पचतीत्युक्ते

व्यापारमात्रस्यावश्यं भावित्वाद् व्यापारविशेषविषयः। प्रतिवचनं तु विशेषनिराकरणेनेति बोद्धव्यम्॥ सङ्घातेनेति। भा। सङ्घातस्यैव प्रयोगादर्थवत्त्वम्। केवलानां तु धातूनामप्रयोगादानर्थक्यम्॥ अतिशब्दस्येति। भा। यद्यप्ययं

कर्त्तुः कुम्भकारस्य व्यापारं णिजाचष्टे दार्ष्टान्तिके त्वाख्यातप्रत्ययः॥ ननु प्रयोजकव्यापारणिजर्थः। कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति चेत्। कारकचक्रप्रयोक्तुः कर्तृत्वे घटस्यातथात्वात्। यदि तु,—

"धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते"

यो भाव इति । (कै)

तथा करणे ल्युडिति भावः ॥

अथवेति । (कै)

प्रौढ्या ॥ नन्वनुमायकलिङ्गप्रश्ने कारकसमवधानकालिकपचत्यादिव्यवहारव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपं लक्षणमुक्तं न तु लिङ्गमित्यतस्तदपि सूचितमित्याह

यस्मिन्निति । (भा)

इतरभेदसाधने लक्षणस्यैव लिङ्गत्वेऽपि लिङ्गान्तरसूचनमिदं विमतं कारकेभ्यो भिद्यते बाधकाभावे कारकासत्ताकाले व्यवह्रियमाणत्वाद्बाधकाभावे यद्यत्कालेन व्यवह्रियते तत् ततो भिद्यत इति प्रयोगः ॥ ननु "[१]यस्मिन् साधन" इति पाठे यत्तद्भ्यां कारकस्यैव क्रियात्वं प्रतीयते तच्च विरुद्धमत आह

१ "यस्मिन् साधने सन्निहिते" इति पाठो दाक्षिणात्यभाष्यपुस्तकेष्वस्ति । "यस्मिन् सन्निहिते" इति पाठः काशीस्थभाष्यपुस्तकेष्वस्ति॥

स्वभावतः कस्मिंश्चिद्विशेषे पचतिशब्दो वर्त्तते ऽतो मन्यामहे नेमे सामान्यशब्दा इति । न चेत् सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्त्तते प्रत्ययः

प्रत्ययसमुदायस्तथापि प्रकृतिभागावबोधपरत्वात् प्रत्ययभागपर्य्यालोचनेनादरादेवमुक्तम् ॥ अथवा पूर्वाचार्यैः कैश्चिदतिः प्रत्ययत्वेन कल्पित इति तदपेक्षयैतदुक्तम् । किं न साधीय इति । भा । यदा प्रकृतिरेव क्रियां

इति भर्तृहरिप्रतिपादितरीत्या प्राधान्येन धातूपात्तव्यापारत्वरूपं कर्त्तृत्वं तवापि सम्मतं कस्तर्हि इदानीमाख्यातार्थः । व्यापारस्य धातुनैवा-

यस्मिन्निति ॥ (कै)

मृगेति । (कै)

ज्ञानं वस्तु सत्तासाधकम् असतोऽपि शशशृङ्गादेः शब्दज्ञानदर्श-नादिति भावः ॥

देशान्तरेति । (कै)

संयोगजभिन्नः संयोगः क्रियाजन्यः कारकजन्यत्वे सति जन्य-त्वादिति प्रयोगः संयोगस्य क्रियाफलमात्रोपलक्षकत्वं बोध्यम् । फलानुमेया क्रियेति तात्पर्य्यम् । एतेन पचत्यादिष्वस्य हेतोरसम्भव इत्यपास्तम् ॥

सम्बन्धग्रहणेति । (कै)

फलव्यापारयोर्जन्यजनकभावग्रहे सति हि कार्य्येण कारणानु-मानं स्यात् स एव तु दुर्घटोऽप्रत्यक्षत्वादिति भावः ॥

एकैकस्येति । (कै)

अधिश्रयणादेरित्यर्थः ॥

प्रत्ययार्थे॥ क्रियाविशेषक उपसर्गः। वा। पचतीति क्रिया गम्यते तां प्रो विशिनष्टि॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र धातुरुपसर्गं व्यभिचरति

साधनं चाह तदा सिद्धमेव प्रकृतेः क्रियावाचित्वम् । अधिरुपरिभाव इति । भा । ततश्चाधीत इत्यस्य विशिष्टार्थयुक्तानां शब्दानां पठनं विधिपूर्वकं वा करोतीत्यर्थः। अध्येतीत्यत्र विशिष्टं स्मरणरूपं ज्ञानं धात्वर्थः। प्रोऽप्य-

---

भिहितत्वात्। अपि च। धातोः सकर्मकाकर्मकत्वविभाग उच्छिद्यते। "अकर्मकाच्च" (१ । ३ । २६) इत्यादिसूत्राणि च विरुध्येरन्। ननु सिद्धा-

[१]प्रत्यक्षत्वेनेति । (कै)

पश्य मृगो धावतीति प्रत्ययादित्यर्थः ॥

[२]बुद्ध्या सङ्कलय्येति । (कै)

स्मृत्या विषयीकृत्येत्यर्थः। उपस्थिते च सम्बन्धग्रहो न प्रत्यक्षेणोपस्थित एवेति नियम इति भावः ॥ एवं सम्बन्धग्रहे सति कार्य्येण तामनुमाय पचतीति प्रयुज्यते इति तात्पर्य्यम् । इदं च योगिप्रयोगविषयं तेषामेवावयवक्रिया प्रत्यक्षात् अस्माकं तद्व्यवहारपरम्परया सर्व्वथाविकल्पात्मक एव प्रयोगः क्रियापदानामिति बोध्यम् । एतच्च "वर्त्तमाने लट्" (३।२।१२३) इति सूत्रे भाष्ये ध्वनितम् ॥ ननु समूहस्याप्रत्यक्षत्वेऽपि एकक्षणस्य प्रत्यक्षत्वसम्भवात् क्रियामात्रे आनुमानिकत्वकथनमयुक्तमित्याशङ्क्यपरिहरति

यदापीति । (कै)

---

१ "प्रत्यक्षत्वे" इति पाठ उपलब्धकैयटेऽस्ति ॥

२ "बुद्ध्या तान् क्षणान् सङ्कलय्य" इत्युपलब्धकैयटेऽस्ति ॥

यत्र न खलु तं व्यभिचरति तत्र कथम् । अध्येति अधीत इति । यद्यप्यत्र धातुरुपसर्गं न व्यभिचरत्युपसर्गस्तु धातुं व्यभिचरति । ते मन्यामहे

मिति । भा । अन्यत्रापि प्रयोगात् । ततस्तान्यत्रास्य योऽर्थो द्योत्यः स एवेहापीत्यनुमीयते । अनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतिवाचीति निर्णयः । भाववचन इति । भा । भावशब्दक्रियामात्र वाची । यथा "यस्य च भावेन"

न्तेऽपि क्रियायाः कर्मापेक्षा नि मात् कथमकर्मकतामिति चेत् न। फलव्यापारयोः सामानाधिकरण्यवैयधिकरण्याभ्याम् सकर्मकाकर्मकविभागस्य

तथा च तस्य व्यवहाराविषयत्वाद्व्यवहारविषया[1]सर्वानुमेयैवेति भाष्यतात्पर्य्यमिति भावः ॥ ननु तदारोपेऽपि वस्तुत एकस्यैव क्षणस्य क्रियात्वेन तत्र प्रत्यक्षत्वं व्यवहारविषयत्वं च दुर्वारमत आह

शब्दशक्तीति ॥ (कै)

एकः क्षण इति । (कै)

अनारोपितसमूहरूप एकः क्षण इत्यर्थः । परे तु [2]अधिश्रयणादिरूपानेकक्षणात्मकस्तस्यापि हस्तप्रसारणपात्रादानचुल्लीसंयोजनाद्योऽवयवाः सन्त्येवेति सोऽपि समूहत्वरूप एव । यस्तु तेषामप्यवयवः परमाणुप्रख्यः स तु शब्दशक्तिस्वभावान्नैव वाच्यो नापि प्रत्यक्षः । अनुमानं त्वेवम् । उत्तरदेशसंयोगादिफलं कारणजन्यं कार्य्यत्वादिति । तच्च कारणं प्रसिद्धातिरेकि इत्यवाधबलात् क्रियारूपमेव सिध्यतीति भाष्यतात्पर्य्यमित्याहुः ॥ नन्वेकार्थबोधकत्वं सामानाधिकरण्यं न प्रकृतेऽत आह

---

१ विषयात् । इ ॥ २ अधिश्रयणादिरूपनैकक्षणात्मकः । इ । क ॥

य एवास्याधेरण्यत्रार्थः स इहापीति । कः पुनरन्यत्राधेरर्थः । अधिरुपरिभावे वर्त्तते ॥ इह तर्हि व्यक्तमर्थान्तरं गम्यते । तिष्ठति प्रतिष्ठत इति ।

(२ । ३ । ३७) इति भावे घञ् इति च । तेन पचादीनामपि धातुसंज्ञा सिध्यति । अस्तिभवतिविद्यतीनामपि भावरूपार्थाभिधायित्वात् । भवति पचतीति । भा । आत्मभरणवचनो भवतिः । तच्चात्मभरणं विरुद्धैकार्थसमवायैः

वक्ष्यमाणत्वात् । किञ्च । "ज्योतिष्टोम यागो" इत्यादौ "करणे यजः" (३ । २ । ८५) इति णिनिरस्मत्पक्षे सङ्गच्छते । धातुत्वेन धातूपात्तां

सामान्येति। (कै)

तथा च धातुलक्षणे क्रियातद्व्याप्यान्यतरवचनत्वं विवक्षितमिति न दोषः। यद्यपि करोतिर्गन्धनावक्षेपणादिष्वपि वर्त्तते। तथापि कारकव्यापार एव तदर्थः प्रसिद्ध इति भावः। तत्र यो व्यापार-सामान्यवाचीतद्विशेषाः पचादयः किं करोति इत्यस्य च यत्करोति तत् किम् इति व्यापारविशेषविषयप्रश्नोऽर्थः। एवं च यन्निष्ठतया प्रश्नविषयक्रियायाः करोति शब्दवाच्या या प्रतीतिः तन्निष्ठतयै-वोत्तरभूतपचतिशब्दवाच्यक्रियायाः प्रतीतिरिति तयोः सामा-नाधिकरण्यं तत्र क्रिया प्रश्नजनकजिज्ञासायास्तद्विषयोत्तरेणैव विरामादेषां क्रियावाचित्वमिति भावः॥ नन्वेवं येनासौ(पनसो। क) वृक्ष इति वत् पचति करोतीति सहप्रयोगापत्तिरिति चेन्न केवलस्य धातोः प्रयोगाभावेन तिङ्प्रयोगे तदर्थपौनरुक्त्यभीत्या तथा प्रयोगाभावात् यत्र तु नेदृशं बाधकं तत्रैधांचकारेत्यादि-प्रयुज्यते एवेति दिक्॥

यदात्विति। (कै)

अस्ति(से:)रपि क्रियाविशेषत्वम्। अत एव गमनासनशयनसंश-

तिष्ठतीति व्रजिक्रियाया निवृत्तिः प्रतिष्ठत इति व्रजिक्रिया गम्यते। ते मन्यामहे उपसर्गकृतमेतद्येनात्र व्रजिक्रिया गम्यत इति। प्रोऽयं

पाकत्वादिभिरविरुद्धैकार्थसमवायम्। यथा शुक्लं रूपमिति शुक्ले गुणे शुक्लत्वं रूपत्वं चास्तीति शुक्लादयो रूपवचनाः। एवं चादयो भाववचना इत्यर्थः। कः पुनरिति। भा। यदि क्रियैव भावस्तदा पक्षान्तरोपादान-

---

भावनां प्रति यजित्वेन तदुपात्तस्यांशान्तरस्य करणत्वात्। पच्यादयो हि धातुत्वेन भावनामाहुः। विक्लित्त्याद्यंशान्तरे तु पचित्वादिना प्रातिस्विकरू-

यात् प्रश्ने आस्ते इति [1]वचनमिति बोध्यम् ॥ पाठनिरपेक्षमिदं लक्षणमिति शङ्कते भाष्ये

तत्रेति ॥ (भा)

ननूपसर्गस्य धात्वर्थविशेषकत्वात् प्रत्ययस्य कर्त्रर्थमेकत्वाच्च प्राप्त्यभावेन प्रतिषेधानुपपत्तिरत आह भाष्ये

संघातेनार्थगतेरिति। (भा)

बोद्धेति शेषः ॥ तद्व्याचष्टे

संघातस्येति। (कै)

उपसर्गप्रत्ययोरित्यस्य तद्विशिष्टयोरित्यर्थ इति भावः ॥

अर्थवत्त्वमिति। (कै)

अन्वयव्यतिरेकाभ्यामिति भावः ॥ भाष्ये

यथा हीत्यादि (भा)

---

१ प्रतिवचनमिति। क ॥

दृष्टापचार आदिकर्मणि वर्त्तते। न चेदं नास्ति* बह्वर्था अपि धातवो भवन्तीति। तद्यथा। वपिः प्रकिरणे दृष्टश्छेदने चापि वर्त्तते। केशश्मश्रु

मनर्थकमथान्यस्तदाऽव्याप्तिरिति प्रश्नः। स्वपदार्थ इति। भा। स्वग्रहणमुपचरितार्थनिवृत्त्यर्थं गौणोऽपि पदार्थो भवति न तु स्वो व्यभिचारात्। पद-

---

पेणाङ्गः। तत्रांशान्तरभावनां प्रति प्रायेण भाव्यतया सम्बध्यते। "ज्योतिष्टोमयाजी"त्यादौ तु करणतया ज्योतिष्टोमाख्येन यागेन स्वर्गं यावित-

---

* "बह्वर्था अपि धातवो भवन्तीति" इत्यारभ्य "स्थापयेति गम्यते" इत्युक्तम् "आदेच उपदेशेऽशितिं" (६।१।४५) इति सूत्रव्याख्यानावसरे भगवता पुनरप्युक्तम् ॥

प्रागुक्तकरोति सामानाधिकरण्यरूपक्रियावाचित्वचिह्नाभावात्तदभाव इति भावः ॥ अतिव्याप्तिनिराकरोति भाष्ये

प्रत्ययार्थस्येति ॥ (भा)

अव्यतिरेकः । (भा)

अभेदः ॥

प्रकृत्यन्तरेषु । (भा)

भिन्नार्थकेषु ॥ प्रत्ययस्याप्यवापोद्धारं दर्शयति

धातोश्चेति ॥ (कै)

अन्यश्चेति । (भा)

लिङ्गभेदादित्यर्थः ॥ "[१]अन्वयव्यतिरेकाभ्याम्" (सिद्धं त्वन्वयव्यतिरेकाभ्याम् । एतत् सूत्रस्थवार्त्तिकम्) इति वार्त्तिकेन धातोरेव क्रियावाचित्वं काल्पनिकमिति प्रतिपाद्यते । इतः उत्तरभाष्यं

१ दाक्षिणात्यभाष्यपुस्तके "अर्थवत्" (१।२।४५) सूत्रे "भूवादि" (१।३।१) सूत्रे च "सिद्धं त्वन्वयव्यतिरेकाभ्याम्" इति वार्त्तिकस्वरूपमस्ति । मध्यदेशीयभाष्यपुस्तके विवरणे च "अन्वयव्यतिरेकाभ्याम्" इत्येवमस्ति ॥

वपतीति । ईडिः स्तुति चोदनायां चासु दृष्टः प्रेरणे चापि वर्त्तते । "अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्ति" इति । करोतिरभूत-

ग्रहणं प्रकरणाद्यनपेक्षत्वप्रतिपादनार्थम् । भवनं भाव इति विग्रहः कर्त्तृसाधननिवृत्त्यर्थः । भेद इति । भा । विनाशोऽज्वाभेदश्छेदश्च घटरज्ज्वादेः स च भावविरोधीति भावः । सर्वान् पुरुषान् इति । भा । किं करोषि

वानित्यर्थप्रतीतेः । स्पष्टं चेदं णिनिविधौ हरदत्तग्रन्थे । एतेन ह्यर्थः पचिरिति भाष्यं व्याख्यातम् । भट्टिस्त्वाह,

[1]"न चेत्सामान्यशब्दाः" इत्याद्यन्तम् "अर्थवत्" (१।२।४५) सूत्रे व्याख्यातं तत एवावधार्य्यताम् ॥

प्रत्ययः प्रत्ययार्थे इति। (भा)

"प्रत्ययद्योत्येऽर्थे" इत्यर्थः । [2]प्रातिपदिकविषये पङ्कस्य प्रातिपदिकार्थतया "अर्थवत्" (१।२।४५) सूत्रस्थभाष्यस्यैव व्याख्येयत्वात्। तदेवं सप्रत्ययकेति व्याप्तिं निरस्य सोपसर्गतां निराकरोति भाष्ये

क्रियाविशेषक इति। (भा)

यथा अन्वयव्यतिरेकाभ्याम् प्रत्ययार्थबोधकस्तथा ताभ्यामेव क्रियाविशेषद्योतक उपसर्गः क्रियावाचीधातुरेवेति भावः ॥

प्रोवीति। (भा)

पचेरुत्कृष्टक्रियापरत्वं द्योतयतीत्यर्थः ॥

---

१ "न चेत्" इत्यारभ्य "अवधार्य्यताम्" इत्यन्तं नास्ति इ पुस्तके ॥

२ "इत्यर्थ" इति नास्ति इ पुस्तके ॥

प्रादुर्भावे दृष्टो निर्मलीकरणे चापि वर्त्तते। पृष्ठं कुरु। पादौ कुरु। उन्मृदानेति गम्यते। निक्षेपणे चापि वर्त्तते। कटे कुरु। घटे कुरु। अश्मानमितः कुरु। स्थापयेति गम्यते। एवमिहापि तिष्ठतिरेव व्रजिक्रियामाह

पचामि किं करोमि पचेत्यादौ विपरीतापि पुरुषानुवृत्तिः सर्वग्रहणेन विवक्षिता। भवतिः पुनरिति। भा। न हि भवति भविष्यति पक्ष्यति अभूद् अपाक्षीद् भवतः पचतः भवन्ति पचन्तीति। का तर्हीति। भा।

"विभज्यसेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून्" ॥

यद्यपि तावदिति। (भा)

उपसर्गव्यभिचारिधातुस्थले तत्त्वासम्भवादिति भावः॥

यद्यप्यचेति। (भा)

धातोरुपसर्गाव्यभिचारेऽपि उपसर्गस्य धातुव्यभिचारात् अन्यत्र द्योत्यत्वेन निश्चितोऽर्थ एवेहाप्यधेरिति भावः॥ नन्विदमयुक्तम् "अधीते" इत्यादावुपरिभावाप्रतीतेरत आह

ततश्चेति। (कै)

उत्कर्षलक्षण उपरिभावेऽधेरर्थे। स च विशिष्टार्थयुक्तत्वरूपो-विधिपूर्वकत्वरूपो वेति भावः॥ केचित्तु अवगमपर्य्यन्तत्वरूप उत्कर्षा-ऽधेरर्थ इत्याहुः॥

[1]विशिष्टस्मरणमिति। (कै)

निरन्तरत्वादिकं तत्रोत्कर्षः॥ भाष्ये

---

१ उपलब्धकैयटे तु "विशिष्टं स्मरणरूपम्" इत्यस्ति॥

तिष्ठतिरेव व्रजिक्रियाया निवृत्तिम्॥ अयं तर्हि दोषः। अस्ति भवति विद्यतीनां धातुत्वमिति॥ यदि पुनर्भाववचनो धातुरित्येवं लक्षणं क्रियते। कथं पुनर्ज्ञायते भाववचनाःपचादय इति। यदेषां भवतिना सामानाधि-

---

कथं सम्बन्ध इति प्रश्नः। एषैवेति। भा। या एषा त्वया एष्टा सैषा वर्णमान स्वरूप इत्यर्थः। पचादय इति। भा। साध्यसाधनभावः सम्बन्धो न तु सामान्यविशेषभाव इत्यर्थः। नन्वन्यत्रोक्तं तिङभिहितो भावः क्रियया

ननु क्रियाया धात्वर्थत्वे पचतीत्यादौ एककर्तृका वर्त्तमाना पचि-क्रिया इति क्रियाविशेष्यको बोधो न स्यात्। प्रत्ययार्थं प्रति प्रकृत्यर्थस्य विशेषणताया औपगवादौ क्लृप्तत्वादिति चेन्न। प्रत्ययार्थः प्रधानमिति

इह तर्हि व्यक्तमिति। (भा)

तत्र व्रजिक्रियाया उपसर्गमात्रार्थत्वे तिष्ठतेर्धातुत्वानापत्तिः। तिष्ठतिमात्रस्य तु नार्थः। तस्य तन्निवृत्त्यर्थकत्वात्। विशिष्टस्य तदर्थकत्वे तु तस्यैव धातुत्वापत्तिरिति भावः॥ समाधत्ते

प्रोयमिति। (भा)

नन्वेवमपि गतिनिवृत्तिवाचिनस्तिष्ठतेः कथं गतिवाचित्वमत आह

अनेकार्थत्वादिति। (कै)

धातोः क्वचिदवश्यकल्प्यनानार्थत्वेनैव प्रकृतार्थनिर्वाहे प्रशब्दस्यार्थकल्पने मानाभाव इति भावः॥ लोकेऽपि प्रथमगमनकर्त्तर्य्येव प्रतिष्ठत इति प्रयुज्यत इति तात्पर्य्यम् तदाह भाष्ये

न चेदं नास्तीति॥ (भा)

करणम्। भवति पचति। भवति पक्ष्यति। भवत्यपाक्षीदिति॥ कः पुनर्भावः भवतेः स्वपदार्थो भवनं भाव इति। यदि भवतेः स्वपदार्थो भवनं भावो विप्रतिषिद्धानां धातुसंज्ञा न प्राप्नोति। भेदः छेदः। अन्यो हि भावोऽन्यो-

---

समवायं न गच्छति। नहि भवति पठति पचति इति। ततश्च तेनैतद्विरुध्येत। तत्राहुः। कर्त्तृकर्मभावेन क्रिया आख्यातवाच्यक्रियया सम्बध्यत एव। भवति पचति पश्य मृगो धावतीति। करणादिभावेन तु न सम्बध्यते। तथा प्रयोगादर्शनात्। भवेदपि भवेदिति। भा। एकस्याः क्रियायाः आत्मापेक्षः साध्यसाधनभावो विरुद्ध इति भावः। कालभेदादिति। भा। स्वाभाविकमन्यत्वं

ह्युत्सर्गः स चेह त्यज्यते। "क्रियाप्रधानमाख्यातम्" इति स्मरणात्। पाचिका इत्यादौ स्त्रीत्वस्य विशेषणत्वाभ्युपगमाच्च। प्रत्युतत्वैव पचतीत्यादावनुपपत्तिः। पचन्तं तं पश्य इत्यादौ शतृशानचोः कर्त्तृप्राधान्यस्य सर्वसम्म-

प्रकिरणे इति। (भा)

माषान्वपतीत्यादौ॥

[1]वृष्टिमीट्टे इति। (भा)

प्रेरयतीत्यर्थः॥ ननु "भाव वचन" इति न्यासे पचादिष्व-व्याप्तिरत आह

क्रियामात्रेति। (कै)

धात्वर्थमात्रे इत्यर्थः। मात्रपदं कार्त्स्न्ये॥ नन्वेवमप्यस्त्यादिष्व-व्याप्तिरत आह

अस्ति भवति (भा)

इत्यादि। तस्मिन् सत्यागतः भवनं भाव इत्यादि प्रयोगात्। अस्त्यादिक्रिया भावपदेन गृह्यत इति भावः॥ नन्वस्त्याद्यर्थस्यापि क्रियात्वे किमपराद्धं पूर्वलक्षणेनेत्यत आह

---

१ ग्रतपथब्राह्मणे द्रष्टव्यम्॥

ऽभावः। आतश्चान्यो भावोऽन्योऽभाव इति यो हि यस्य भावमिच्छन्ति स न तस्याभावं यस्य चाभावं न तस्य भावम्॥ पचादीनां च धातुसंज्ञा न प्राप्नोति। यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामा-

---

कालसाधनभेदेन व्यज्यते। एकस्येति। भा। अपि भवेदित्यत्र योभवतिस्तस्या-रोग्यादिविशिष्टदेवदत्तादिकर्तृका सत्ता वर्तमानार्थस्तथाभूता हि सत्ता प्रार्थते इति वर्तमानकालः प्रत्ययः सा तु सत्ता भवेदित्यस्याः सत्तायाः कर्तृत्वेन

ततया तिङन्त्वपि तथात्वापत्तेः। शप्चादीनां तिङाश्च लादेशत्वस्याविशिष्ट-त्वात्। आदेशानां च स्थानिस्मारकत्वे स्थान्यर्थाभिधायित्वे वार्थैक्यश्रौव्यात्।

भावरूपेति । (कै)

क्रियाशब्दः सपरिस्पन्दसाधनसाध्यार्थे रूढो भावशब्दस्य सपरिस्पन्दापरिस्पन्दान्यतरसाधनसाध्ये इति भावः ॥ इतरे भवत्यर्थोऽस्य भावशब्देन विवक्षित इत्याशयेन पृच्छति भाष्ये

कथं पुनरिति ॥ (भा)

ननु भवतिपचत्योर्नैकार्थबोधकत्वरूपं सामानाधिकरण्यम् । भावः सत्ता विक्लित्त्यनुकूलव्यापारस्य पाक इति तयोरत्यन्तवैलक्षण्यादत आह

नाधिकरण्यं निदर्शितं न तथा भाववचने धातौ निदर्श्यते । करोतिः पचादीनां सर्वान् कालान् सर्वान् पुरुषान् सर्वाणि वचनान्यनुवर्त्तते भवतिः पुनर्वर्त्तमानकालं चैवैकत्वं च ॥ का तर्हीयं वाचो युक्तिर्भवति पचति भवति पक्ष्यति भवत्यपाक्षीदिति । एषैषा वाचो युक्तिः । पचादयः क्रिया भवति क्रियायाः कर्त्र्यो भवन्तीति । यद्यपि तावदत्रैतच्छक्यते । वक्तुं यत्रान्या चान्या

निर्दिष्टेति भेदोऽस्त्येव । अन्त्वयमिति । भा । भेदादयोऽपि भवन्तीति तद्वचनानां सिध्यति धातुसंज्ञा । एतान्यपीति । भा । एतत्प्रतिपाद्यानि वस्तूनीत्यर्थः । भाव्यते यः स भाव इति । भा । तेन साध्यमानार्थवाचिनां धातुसंज्ञेत्यर्थः । स्वभावसिद्धमिति । भा । शब्दशक्त्यनुसारेणैतदुच्यते । कृतता क्रियमाणता कर्त्तव्यता युक्तान्यपि द्रव्याणि सिद्धरूपाण्येव प्राति-

---

अत एव हि "युष्मदि समानाधिकरणे मध्यमः" (१ । ४ । १०५) "अस्मद्युत्तमः" (१ । ४ । १०७) इत्यादिपुरुषव्यवस्था सङ्गच्छते । अभिहिते कर्त्तरि प्रथमा इत्यादि च । न च समानाधिकरण इत्यनेन स्वाभिधेयसङ्ख्यान्वयित्वमभिहितशब्देन चाभिहितसङ्ख्याकत्वं विवक्षितमिति वाच्यम् ।

आत्मभरणेति । (कै)

आत्मभरणं चाषष्ठाद्भावविकारादनुस्यूतं सदिति प्रत्ययवेद्यं रूपं तच्च केवलान्वयित्वात् पदार्थमात्रसमानाधिकरणम् एवं चाश्रये पचि क्रियाबोधे तत्समानाधिकरणात्मभरणस्यापि तत्र सत्वेन तद्वाचकत्वं पचादीनां यथा शुक्ले गुणे रूपत्वसत्तामात्रेणारूपवचनत्वशुक्लादीनाम् । तदुक्तं

पाचकत्वादिभिरिति । (कै)

"आदिना"इत्यादि । "पाकत्वादिभिः" इति पाठान्तरम् ॥ अत्र "आदिना" गमनत्वादि ॥

विरुद्धेति । (कै)

परस्परमित्यादि । एवं च पचति भवतीत्यादेर्यत्कर्त्तृका पचि क्रिया तत्कर्त्तृका सत्तेति बोधः। एवं च भवत्यर्थपचत्यर्थयोरेकाधि-

---

